॥ श्रीः ॥

श्रीपादसप्ततिः ॥

Sreepadasaptati

of

Meppathur Bhattadiri.

With the Commentary

by

Kunhan Raja of Cranganore.

THE MANGALODAYAM PRESS,

TRICHUR.

॥ श्रीरस्तु ॥

श्रीपादसप्ततिः ॥

श्री नारायणभट्टपादप्रणीता ।

कविसार्वभौम श्री कोटिलिङ्गपुर कोच्चुण्णिराज-
ज्येष्ठसहोदरेण पण्डितवरेण्येन कुञ्जनराजेन
विरचितया अन्वयबोधिन्याख्यया
व्याख्यया समेता ॥

प्रसाधकः

ख्यातुः प्रियशिष्यः मुण्टनाट् शङ्करन्नम्पूतिरि ॥

श्री शिवपुरस्थ

मङ्गळोदयमुद्रालये मुद्रितः

श्री कोच्चुण्णिराजस्य

अनुमतिपत्रिका ॥

श्रीपादसप्ततिस्तोत्रव्याख्यामन्वयबोधिनीम् ।
अस्मज्ज्येष्ठेन विदुषा 'कुञ्जा'ख्येन विनिर्मिताम् ॥ १ ॥

'चेरोट्टूर् मुण्टनाटा'ख्यगृहजाय द्विजन्मने ।
तस्यान्तेवासिने त्वद्य 'शङ्करा'य ददाम्यहम् ॥ २ ॥

अवतारिका ॥

इदं हि सुविदितमेव सर्वेषां, यदुत श्रीनारायणभट्टपादनामा महाकविः केरळेषु कृतावतारः श्रीनारायणीयादिस्तोत्ररत्नानां प्रक्रियासर्वस्वादिमहाग्रन्थानां च प्रणयनेन समग्रमेव संस्कृतसाहित्यमनुगृह्य वर्षशतकत्रयात् पूर्वमगाहत ब्रह्मभूयमिति । अस्य च महाकवेरनर्घेषु ग्रन्थरत्नेषु सुबहून्येतावद्दवधि मुद्रणप्रकाशनाभावाद्बहिरनवतीर्णानि विद्यन्त इत्यैतिहासिका वर्णयन्ति । तादृशेषु महाग्रन्थेष्वन्यतमोयं श्रीपादसप्ततिर्नाम मधुनिष्पन्दी निबन्धः ॥

अनया च सप्तत्या कविः श्रीमन्मुक्तिपुराधिवासिनीं देवीं स्तुवन्नसाधारणगुणगणरमणीयानां नवनवशब्दार्थोल्लेखानामाविष्करणेन रसिकधुरीणानां सहृदयानामिव, श्रीदेवीपूजादिविषये परमनिगूढानां तत्त्वानामुद्घाटनेन श्रीदेव्युपासकानां भक्तशिरोमणीनामपि चेतः परमानन्दसागरे निमज्जयतीति सर्वेपि सम्मन्येरन्नेतत्पाठकाः । निसर्गसुन्दरैरुपमोत्प्रेक्षादिभिरलङ्कारैरखिलजनमनस्सु कृतसंश्लेषैः श्लेषादिभिः सुजनमनोरसायनै रसभावादिभिश्च सप्ततिरियं किमप्यनुपमं कामनीयकमावहति ॥

इह हि जगति "द्वित्रा एव कवयः, द्वित्राण्येव काव्यानि" इत्युक्तरीत्या विरळा एव महाकवयः । तत्रापि च विरळतराः श्रीपादपक्षताः । श्रीनारायणभट्टपादस्तु श्रीमद्विष्णुभागवतसार-

संग्रहरूपस्य श्रीमन्नारायणीयस्तोत्रस्य प्रणयनेनाप्यनपगतद्वैतभावः सुबहु दूयमानमानसः स्वप्ने श्रीकृष्णपरमात्मनः समादेशेन श्रीमुक्तिस्थलस्थितां निखिलचराचरसृष्टिस्थितिसंहारकारिणीं परामम्बिकामनेन स्तोत्ररत्नेन सभक्तिकमुद्वायन्नवस्थिताद्वैतबुद्धिस्सुप्रसन्नचेतास्समभूदिति श्रूयते कापि जनश्रुतिः । अनया च कथयास्य परमभक्तत्वमस्याश्च सप्ततेर्भक्तिजनकत्वं विशदीभवति ॥

एवंभूतस्यास्य ग्रन्थस्यान्वयबोधिनीन्नाम कामपि रमणीयां व्याख्यां निर्मितवान् कोटिलिङ्गपुरभूषणायमानः श्रीमान् कुञ्चन्तम्पुरान् महाशयः संस्कृतभाषाया महान्तमुपकारं व्यधादिति नेदं विशिष्य वक्तव्यम् । इयं च व्याख्या यद्यप्यन्वयबोधिनीति विनीतं नाम बिभर्ति तथापि शब्दव्युत्पत्त्यादीनि व्याकरणकार्याणि रसालङ्कारनिरूपणादीन्यलङ्कारशास्त्रकार्याणि च सुष्ठु विशदयतीति सर्वेपि सकृदेतत्परिशीलनेन प्रतिपद्येरन् । महती खल्वियं भूषा श्रीपादसप्ततेः ॥

एवंभूतामिमां सप्ततिमनया व्याख्यया सह प्रकाशयितुं कृतोद्यमः शङ्करन् नम्पूतरि महाशयो न केवलं स्वगुरौ व्याख्यातरि परन्तु लोकगुरौ ग्रन्थकर्तर्यपि स्वस्य महीयसीं भक्तिमाविष्करोत्यनुगृह्णाति च बलवत्संस्कृतपाण्डितसमुदायमिति सुधीरं प्रतिपादयन्नेतावता विरमामि ॥

इति विधेयः ॥

TRICHUR.
8—11—24.

K. Vasudevan Moossed.

प्रस्तावना ॥

श्रीपादसन्ततिरिति प्रख्यातोयं स्तोत्रतल्लजः श्रीमन्मेप्पत्तू-राख्यगृहकृतजन्मना नारायणीयादिग्रन्थप्रणेत्रा नारायणभट्टपादेन विरचितो 'मूक्कोल' इति प्रसिद्धे मुक्तिस्थलक्षेत्रे कृतसन्निवानायाः श्रीपराम्बिकाया गुणवर्णनपरश्चेति विदितमेवेदं विदुषाम् । अत्र संयोजिता चान्वयबोधिन्याख्या व्याख्यास्मद्गुरुपादानां कोटि-लिङ्गपुरराजानां कृतिः। अत एव वयमेतत्प्रकाशने कृतोद्यमाः स्मः ॥

व्याख्यातृणामस्मदाचार्याणामवरजो ग्रन्थस्यास्य स्वामी च कविसार्वभौमः श्रीमान् कोच्चुण्णिभूपः सदयमेतन्मुद्रापणेऽनुमतिं व्यतरदिति तस्मिन् महाशये, के. वि. एम्. इति सुविदितः श्रीमान् के. वासुदेवन् मूस्स् महाशयोऽस्यावतारिकामेकां व्य. लिखदिति तस्मिन्, मङ्गळोदयपुस्तालयस्य स्वाम्यं वहन्ती श्रीमती योगक्षेमजनता ग्रन्थमेनं सुष्ठु सम्मुद्य प्रादादिति तस्यां च चिर-स्य कृतज्ञा भवामः ॥


कालेस्मिंस्तत्रतत्र प्रवर्तमाने प्राक्तनानाममुद्रितानां ग्रन्थर-त्नानां संशोधनसम्मुद्रणादिसमुद्यमे केरळमण्डलमण्डनायमानस्य

श्रीनारायणभट्टपादस्य कृतेरभिनवशब्दार्थचमत्कृताया विशिष्य देवीविषयकरतिभावातिशयरमणीयाया अस्यास्सप्ततेरेवं बहिरवतारणेस्माभिरेवमास्थितः प्रयासो नास्थाने भवेदिति सुदृढं विश्वसिमः। समर्पयामश्चैनां सहृदयधुरीणानां विद्वन्मणीनां पुरस्तात् ॥

इति

कोटिलिङ्गपुरम्
१२—३—१००.

मुण्टनाट् शङ्करन् नम्पूतिरि ॥



शुद्धपत्रिका ॥

पृष्ठं	पंक्तिः	अशुद्धम्	शुद्धम्
१	९	दक्षाधः	दक्षात्
१	१३-१४	ऊर्द्ध	ऊर्ध्वं
६	११	प्रसिद्धं	प्रसिद्धिं
११	१६	काणात्	कारणात्
१२	२	धन्यो	धन्यौ
१२	२	निर्मलौ यौ	निर्मलौ विमलौ यौ
१३	३	मुम्	नुम्
१४	१२	वासिनी	वासिनि
१४	१४	आंनम्रे	आनम्रे
१४	१८	आनने	आनते
१५	९	आनतस्व	आनतस्य
१५	२०	सन्द्रा	सान्द्रा
१६	७	यदादीयते	यदाधीयते
१६	१२	निर्यातनञ्च	निर्यातनञ्च
१७	८	सम्भ्रम	सम्भ्रमः
१७	१८	आलिङ्गिनवत्यभूः	आलिङ्गितवत्यभूः
१८	७	पिशिनष्टि	विशिनष्टि
१८	१४	उडुवान्	उडुपान्
१९	३	ईर्ष्य	ईर्ष्या
१९	४	पादप्रणामेने	पादप्रणामेनेति
१९	६	शिरो स्थितस्याः शिरो-स्थनिकरोटिस्त्री इत्यमरः	शिरोस्थि शिरोस्थनिक-रोटिस्त्री इत्यमरःतस्याः
१९	१४	भूयं	भृयः
२०	८	ययाः	यस्याः

पृष्ठं	पंक्तिः	अशुद्धम्	शुद्धम्
२०	१४	संसर्गेग	संसर्गेण
२०	१५	किमुक्तव्य	किमु वक्तव्यमिति
२०	१६	काव्यार्थावति	काव्यार्थापत्तिः
२१	५	नोगच्छन्	नागच्छन्
२१	५	दे	हे
२१	१०	हेतुवान्	हेतुत्वात्
२२	१	प्रतिफलद्रूप	प्रतिफलद्रूपे
२४	४	यद्यनेन	लभ्यते
२४	१२	जछाय	जच्छाय
२४	१३	स्तौति	स्तौति
२४	१५	भुवनश्वरि	भुवनेश्वरि
२४	१५	भुवनं	भुवने
२४	१९	नश्यन्नि	नश्यन्ति
२५	१	अकल्पः	आकल्पः
२५	२०	परागा	सपरागा
२८	९	रक्तिमाभिर्भावै	रक्तिमाविर्भावैः
२९	३	भर्त	भर्तृ
३०	८	नखांशु	नखांशु
३४	१५	त्ववर्णा	त्वपर्णा
३४	२०	क्षणात्	लक्षणात्
३६	२	इताङ्गिना	इतीङ्गिना
३८	२	सुम्भा	सुम्भं
३८	९	नासि	तासि
३९	७	अवलापे	अपलापेन
३९	१७	क्षायि	क्षिक्षय

पृष्ठं	पंक्तिः	अशुद्धम्	शुद्धम्
४०	१२	निलिम्ब	निलिम्प
४२	५	घणि	घञि
४२	१४	नाथ	नाथे
४२	१७	इति कखुकञि	इति खुकञि
४३	५	उच्चाटयन्यु	उच्चाटयन्त्यु
४४	३	तस्तात्	तस्मात्
४६	१५	स्वाच्छ	स्वच्छ
४७	१४	रजोभी:	रजोभि:
४७	१७	श्रेष्ठ:तथैव	श्रेष्ठतथैव
४८	१३	नस्वमिषा	नखमिषा
४९	१	उपलोग्रावरणयो	उपलोग्रावरत्नयो
५२	९	अध:शिरसिपदे	अधशिरसीपदे
५२	१३	अधशिरसिपदे	अधशिरसीपदे
५३	७	सौभाग्यं वर्णयन्	सौभाग्यंच वर्णयन्
५६	१३	सौभाग्यं वर्णयन्	सौभाग्यंच वर्णयन्
५६	१७	दोषोक्ते	दोषोक्तौ
५७	५	विनोदाय	विनोदनाय
६२	८	रागगुणं वर्णयन्	रागगुणं च वर्णयन्
६२	१०	दिवकुम्भि	दिक्कुम्भि
६४	३	स	श
६९	१३	तस्या	या तस्या
६९	१७	पुनस्ततस्या	पुनस्तस्या
७३	१३	मातरिश्वा	मातरिश्वा
७४	१७	मेदिनि	मेदिनी
८१	१०	पद्यस्यतदर्थे	पद्यत्यतदर्थे

———— :•: ————

हरिः श्रीगणपतये नमः

अविघ्नमस्तु ।

श्रीपादसप्ततिः ॥

दक्षाधः करपल्लवे लसदसिं दक्षोर्ध्वगे शूलिनीं
वामोर्ध्वे फलकोज्ज्वलां कटितटन्यस्तान्यहस्तांबुजाम् ।
शूलाग्राहतकासरासुरशिरोनिष्ठां प्रहृष्टां सुरै-
र्जुष्टामिष्टफलप्रदां भगवतीं मुक्तिस्थलस्थां भजे ॥ १ ॥

श्रीकुरुंबवनावासां नत्वा काळीं यथामति ।
श्रीपादसप्ततिव्याख्यां करोम्यन्वयबोधिनीम् ॥

अथ नारायणनामा देवीभक्तः कश्चन कविः श्रीपादसप्तति-स्तोत्रं चिकीर्षुः विघ्नविघाताय देवीभजनरूपं मंगळमाचरति । दक्षे-ति—अहं दक्षाधः दक्षिणात् करादित्यर्थः । अधः अधोभागे । दक्षाध इत्यव्ययं पृथक्पदम् । यः पल्लवः प्रवाळ इव करः हस्तः तस्मिन् करपल्लवे । लसन् शोभमानः असिः खड्गः यस्याः तां लसदसिम् । अथवा दक्षो यः अधःकरपल्लवः तस्मिन् । एतत्पक्षे उत्त-रत्र करपल्लव इत्यध्याहार्यम् । ऊर्द्धं गच्छतीत्यूर्द्धगः उपरिस्थः दक्षश्चा-सावूर्द्धगश्च तस्मिन् करपल्लवे शूलिनीं शूलायुधवतीं वामस्सव्यश्चा-

सावूर्ध्वः उपरिस्थितश्च तस्मिन् वामोर्ध्वे करपल्लवे फलकेन चर्मणा उज्ज्वलां प्रकाशमानाम्। नि—फलकोस्त्री फलञ्चर्मेत्यमरः। कटेस्तटे श्रोणिप्रदेशे न्यस्तं अर्पितं अन्यदुक्तव्यतिरिक्तं हस्तांबुजं वामाधःकरारविन्दं यस्यास्तां तथोक्ताम्। तथा शूलाघेणाहतस्य आविद्धस्य कासरासुरस्य माहिषासुरस्य शिरसि मस्तके निःसरां सम्यक्तिष्ठतीति तथोक्ताम्। सुरैः देवैः जुष्टां सेवितां अत एव प्रहृष्टां सन्तुष्टां इष्टफलप्रदां भक्तानां वाञ्छितार्थप्रदात्रीं मुक्तेः स्थलं मुक्तिस्थलमित्यन्वर्थं देव्यालये तिष्ठतीति मुक्तिस्थलस्थाम्। अनेन स्वस्य मुक्तिकामत्वं सूचितम्। भगवतीं ऐश्वर्यादिषड्गुणपरिपूर्णां देवीं भजे उपासे। तदुक्तं ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ज्ञानवैराग्ययोश्चापि षण्णां भग इतीरणेति ॥

यत्संवाहनलोभिनश्शशिकलाचूडस्य हस्तांबुज-
स्पर्शेनापि च लोहितायति मुहुस्त्वत्पादपङ्केरुहम् ।
तेनैवोद्धतकासरासुरशिरश्शृंगाग्रसञ्चूर्णन-
प्राचण्ड्यन्तदनुष्ठितं किल कथं मुक्तिस्थलस्थे शिवे ॥

अथ सप्तत्या श्लोकैः श्रीपार्वतीश्रीपादस्तवमारभमाणः प्रथमं सौभाग्यं मार्दवं शत्रुसंहारदाक्ष्यञ्च वर्णयन् श्रीपादं स्तौति। यदिति—हे मुक्तिस्थलस्थे शिवे पार्वति। यत् त्वत्पादपङ्केरुहं तव चरणपद्मं कर्त्तृ संवाहनलोभिनः स्वस्य सुखमर्दनलुब्धस्य शशिकला-

चूडस्य भगवतो महेश्वरस्य हस्तांबुजस्पर्शेन करारविन्दमृदुसम्पर्केणापि मुहुः पुनः पुनः लोहितायति अलोहितं लोहितं भवति पूर्वतोप्यतिरक्तं भवतीत्यर्थः । चेति विनिश्चये च पादपूरणे पक्षान्तरे विनिश्चये इति विकाण्डशेषः । सू—लोहितादिडाज्भ्यः क्यषिति क्यषि वा क्यषः इति परस्मैपदम् । अकृत्सार्वधातुकयोरिति दीर्घः । तेनैव माईवातिशयेन भगवन्मृदुकरस्पर्शैमप्यसहिष्णुना त्वत्पादपङ्केरुहेणैव कर्त्तृणा तत् पुराणादिप्रसिद्धम् । उद्धतकासरासुरशिरश्शृंगाग्रसंचूर्णनप्राचण्ड्यं उद्धतस्य गर्विष्ठस्य कासरासुरस्य महिषासुरस्य यत् शृंगमिव शिरो मस्तकं तस्याग्रस्य यत् संचूर्णनं सम्यक्चूर्णीकरणं तस्मिन् प्राचण्ड्यं अतिकोपनत्वं अतिक्रौर्यमिति यावत् । कथमनुष्ठितम आचरितम । किलेत्यरुचौ । किल संभाव्यवार्त्तयोः हेत्वरुच्योरलोके च इति हैमः । अतिमृदुस्वभावस्य त्वत्पादपद्मस्य उक्तकाठिनवस्तुचूर्णनकारित्वं अत्याश्चर्यकरमिति भावः । अत एव विषमालङ्कारभेदः । विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत् विरूपघटना चेति विषमालंकृतिस्त्विधेति लक्षणात सन्देहोलङ्कारः ॥

त्वत्पादन्निजमस्तके घटायितुं के के नु लोके जनाः
किंकिं नारचयन्ति दुश्चरतपश्चर्यासपर्यादिकम् ।
मन्ये धन्यतमन्तु देवि महिषं वैरस्थयैव त्वया
यन्मूर्ध्नि स्वयमेव पातकहरं पादांबुजं पातितम् ॥

शत्रावपि वात्सल्यं द्योतयन् श्रीपादं स्तौति । त्वत्पादमिति—हे देवि लोके भुवने के के जनाः लोकाः । नु स्यात्प्रश्ने विकल्पार्थेप्यतीतानुनयार्थयोरिति विश्वः । निजमस्तके स्वशिरासि त्वत्पादं घटयितुं योजयितुं प्रणामादिना शिरसा त्वत्पादं स्प्रष्टुमित्यर्थः । किंकिं दुश्चरं दुष्करं यत् तपसः कृच्छ्रादिकर्म्मणः चर्या अनुष्ठानं सपर्या पूजा ते आदौ यस्य जपहोमदानादेः तत् तपश्चर्यासपर्यादिकं तत् नारचयन्ति न कुर्वन्ति । उभयत्रापि वीप्सायां द्विर्भावः । त्वत्पादस्पर्शेच्छया सर्वेपि जनाः सर्वमपि सुकृतकर्म्म अतिक्लेशेनापि कुर्वन्ति । न तु तं अव्यभिचारेण साधयन्ति चेत्यर्थः । अहं तं महिषं महिषासुरं तु अतिशयेन धन्यं धन्यतमं अतिभाग्यवन्तं मन्ये । कुत इति चेत् त्वया वैरस्थयैव विरोधवत्यैव सत्या यस्य महिषस्य मूर्ध्नि मस्तके स्वयं आत्मनैव नतु प्रार्थनादिनेत्यर्थः पातकहरं स्पर्शमात्रेण सकलपापनाशकं पदांबुजं पातितम् । णिजन्तात् कर्मणि क्तः । ऋष्यादयोपि कृच्छ्रेण त्वत्पादस्पर्शमात्रं कदाचित् लब्धवन्तः महिषस्तु प्रयत्नं विनैव त्वत्पादं चिरकालं धृतवानिति अहो भाग्यं तस्येत्यर्थः । अत्र भगवतीपादस्य पापहरत्वादिगुणेन महिषस्य धन्यतमत्वरूपगुणो वर्णित इति उल्लासालङ्कारः । एकस्य गुणदोषाभ्यामुल्लासोन्यस्य तौ यदीति लक्षणात् ।

त्वत्पादांबुजमर्प्पितं क्वनु शिवे किन्नु त्रयीमस्तके
नित्यं तत्त्वविचारदत्तमनसां चित्तांबुजाग्रेषु वा ।

किं वा त्वत्प्रणयप्रकोपविनमन्मारारिमौलिस्थले
किं प्रोत्खाण्डितघोरसैरिभमहादैत्येन्द्रमूर्द्धान्तरे ॥

उपनिषत्प्रतिपाद्यत्वादिगुणं वर्णयन् श्रीपादं स्तौति । त्वदिति— हे शिवे त्वया त्वत्पादांबुजं तव चरणारविन्दं क्वनु वक्ष्यमाणेषु आधारेषु मध्ये कुत्र वा अर्पितं क्षिप्तम । नु इति पृच्छायाम् । स्वयं मस्तके वेदत्रयोपनिषदि अर्पितं किन्नु नित्यं सदा तत्वविचारे ब्रह्मतत्वचिन्तने दत्तमनसां समाहितचित्तानां जनानां चित्तांबुजाग्रेषु हृदयकमलकर्णिकासु वा अर्पितम् । तव प्रणयप्रकोपे भगवत्यनुरागानिमित्ते अन्यासंगादिशङ्काकृते रोषे विशेषेण नमतः नमस्कुर्वतः मारारेः मौलिस्थले शिरोदेशे अर्पितं किं वा । नमस्कारेणापि कोपाशमनात् भगवत्या शिरसि पादेन ताडनादिति भावः । एतेन देव्या भगवति अनुरागातिशयः द्योतितः । अथवा प्रोत्खण्डिते प्रकर्षेण उत्खण्डिते शूलाग्रदाळिते घोरस्य सैरिभमह दैत्येन्द्रस्य माहिषमहासुरेन्द्रस्य मूर्द्धान्तरे शिरोमध्ये अर्पितं किम् । उपनिषत्प्रतिपाद्यमानं योगिभिस्समाधौ चिन्त्यमानं परमेश्वरेण शिरसा वन्द्यमानञ्च स्वपादं वैरिणोपि माहिषासुरस्य शिरसि निहितवतीत्यहो करुणातिशयो भवत्या इति भावः । सन्देहालङ्कारः ॥

त्वत्पादाञ्चलरूपकल्पलतिकाबालप्रवाळद्वयं
ये तावत् कलयन्ति जातु शिरसा नम्रेण कम्रोज्ज्वलम् ।

तेषामेव हि देवि नन्दनवनक्रीडासु लभ्यं पुनः
स्वर्वल्लीतरुणप्रवाळभरणं सेवानुरूपं फलम् ॥

स्वर्गादिसाधकत्वं वर्णयन् श्रीपादं स्तौति । त्वदिति—हे देवि ये पुरुषाः जातु कदाचिदपि नम्रेण नतेन शिरसा मूर्ध्ना कम्रं कमनीयं च तदुज्वलं प्रकाशमानं च कम्रोज्वलं तव पादयोः अञ्चलं अग्रं रूपं स्वरूपं ययोः तौ त्वत्पादाञ्चलरूपौ यौ कल्पलतिकायाः बालकल्पवल्याः प्रव ळौ पल्लवौ तयोः द्वयं कलयन्ति तावत् धारयन्त्येवेत्यर्थः । तेषामेव पुरुषाणां पुनः नन्दनवनक्रीडासु देवोद्यान क्रीडासु स्वर्वल्याः कल्पलताया: यौ तरुणप्रवाळौ बालपल्लवौ तयोः भरणं देवस्त्रीभिरर्पितं शिरसा धारणं लभ्यं प्राप्यम् । भवति हीति पुराणादिप्रसिद्धं द्योतयति । यतः फलं भजनादि कर्म्मफलं सेवानुरूपं भजनानुगुणं भवति । त्वद्भजनादेव स्वर्गादि फलं सिध्यतीति भावः । अत्र कार्यस्य कारणसारूप्यवर्णनात् समालङ्कारभेदः । सारूप्यमपि कार्यस्य कारणेन समं विदुरिति लक्षणात् । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः रूपकालङ्कारश्चेति त्रयाणां सङ्करः ॥

धावल्यं परिलाल्यते पुररिपोरङ्गेन तुङ्गश्रिया
किञ्च श्यामळिमापि कोमळतरे भात्येव गात्रे हरेः ।
तत्तादृक्पदवीम्ममापि जनयेत्यस्तोकसेत्वारसा-
दारुण्यं तव लीयते चरणयोः कारुण्यमूर्त्ते शिवे ॥

रागगुणं वर्णयन् श्रीपादं स्तौति द्वयेन । आरुण्यमि-
ति— कारुण्यं करुणैव मूर्त्तिः शरीरं यस्याः तस्याः संबुद्धिः ।
हे कारुण्यमूर्त्ते शिवे पार्वति । आरुण्यं रक्तवर्णः कर्तृ ।
अस्य च लीयत इत्यनेनान्वयः । तुङ्गश्रिया अधिककान्तिना पुरारि-
पोः त्रिपुरान्तकस्य शिवस्यांगेन शरीरेण कर्त्रा । नि— अङ्गं
गात्रे प्रतीकोपाययोः पुंभूम्नि नीवृतीति मेदिनी । धावल्यं
शुक्लवर्णः परिलाल्यते आदरेण ध्रियत इत्यर्थः । कर्म्मणि लट् ।
किञ्च श्यामळिमापि कृष्णवर्णोपि कोमळतरे अतिमनोहरे हरेः
नारायणस्य गात्रे शरीरे भाति शोभत एव । तत् तस्मात् उभयोः व-
र्णयोः उत्कृष्टस्थानलाभात् हेतोः ममापि तादृशीं पदवीं तथाभूतं
स्थानं जनय उत्पादय इति संप्रार्थ्य । अस्तोकसेवारसात् अन-
ल्पभजनसन्तोषाद्धेतोः तव चरणयोः लीयते । पादौ शरणं
प्राप्य भजत इत्यर्थः । सू । देवादित्वात् श्यन् । अत्र स्वा-
भाविके देवीपादरक्तवर्णे उक्तप्रार्थनापूर्वकभजनरसो न हेतु-
रिति तस्य हेतुत्वेनोत्प्रेक्षणात् हेतूत्प्रेक्षा व्यञ्जकाप्रयोगात्
गम्या । अचेतनवर्णविशेषवृत्तान्तवर्णनेन सजातीयसमत्सर-
चेतनवृत्तान्तप्रतीतेस्समासोक्तिरपि । तयोश्च सङ्करः ॥

आरुण्यं यदिदं त्वदीयपदयोराभाति तत्केचन-
प्राहुस्तुङ्गनितम्बभारभरणक्लान्त्या किलोपागतम् ।

अन्ये माहिषमूर्द्धपेषमिळितं रक्तद्रवं मन्वते
मन्येहं तु नतेषु सान्द्रमनुरागोद्गारमेवानयोः ॥

आरुण्यमिति— हे देवि त्वदीयपदयोः अधिकरणे यदिदं दृश्यमानं आरुण्यं रक्तवर्णः आसमन्तात् भाति शोभते । केचन तत् आरुण्यं कर्म्म तुङ्गः उन्नतः महानिति यावत् । यो नितंब एव भारः तस्य भरणेन धरणेन या क्लान्तिः श्रमः तया तुङ्गः पर्वत इव यो नितंब इति वा । नि— तुंगः पुन्नागनगयोर्बुधे स्यादुन्नतेन्यवत् इति हैमः । उपागतं उद्भूतं किलेति संभाव्ये । प्राहुः वदन्ति । ब्रुवः पञ्चानामित्यादिना ब्रूञ आहादेशः । अन्ये कवयः तत् त्वत्पदारुण्यं कर्म महिषस्यासुरस्यायं माहिषो मूर्द्धा मस्तकः तस्य पेषेण पेषणेन मिळितं सङ्क्रान्तं रक्तानां शोणितानां द्रवं मन्वते मन्यन्ते । अहं तु तत् आरुण्यं नतेषु नमस्कारकर्त्तृषु विषये अनयोः त्वदीयपदयोः संबन्धिनं सान्द्रं निबिडीभूतं अनुरागस्य प्रेमातिशयस्य वात्सल्यापरपर्यायस्य उद्गारं अन्तः पूर्णस्य बहिर्निस्सारम् । धर्मधर्मिणोरभेदोपचारः । उद्गीर्णं अनुरागमित्यर्थः । एव मन्ये । यशसि धावल्यस्येवानुरागे रक्तत्वं कविसङ्केतसिद्धान्तमिति बोद्धव्यम् । अत्र देवीपादरागे भक्तविषयकानुरागत्वारोपफलकस्य कविकल्पितनिरुक्तक्लान्तिहेतुकत्वादेः परपक्षत्वोपन्यासेनाह्नवस्य सत्वात् शुद्धापह्नुतिरलङ्कारः ॥

प्राहुः पद्मसमाश्रयं शतधृतिं त्वत्पादपद्माश्रया-
दन्तस्त्वत्पदपद्मवीक्षणवशात् कृष्णोपि पद्मेक्षणः ।
यत्पद्मार्चनमामनन्ति सुधियो दारिद्र्यविद्रावणं
मुक्तिक्षेत्रगते भवानि तदपि त्वत्पादपद्मार्चनम् ॥

ब्रह्मणः पद्माश्रयत्वं विष्णोः पद्मेक्षणत्वं च कोशादिप्रसिद्धं पद्माया रमाया अर्चनमिति व्युत्पत्तिसिद्धस्य पद्मार्चनस्य दारिद्र्यनाशकत्वं च आगमादिप्रसिद्धं देवपादपद्मपरतया समर्थयन् श्रीपादं स्तौति । प्राहुरिति— हे मुक्तिक्षेत्रगते मुक्तेः क्षेत्रं देवादिसिद्धस्थानं मुक्तिक्षेत्रं तद्गते भवानि पार्वति । क्षेत्रं शरीरे केदारे सिद्धस्थानकळत्रयोरिति मेदनी । सुधियः विद्वांसः शतधृतिं ब्रह्माणं । शतानन्दश्शतधृतिः स्वयंभूस्सर्वतोमुख इति वैजयन्ती । तव पादपद्मयोः आश्रयात् शरणप्राप्तेः हेतोः पद्मे सम्यगाश्रयतीति व्युत्पत्त्या नामैकदेशग्रहणन्यायेन पद्मसमाश्रयं प्राहुः । वदन्ति । न तु पद्मासनत्वादितिभावः । कृष्णो विष्णुरपि अन्तरभ्यन्तरे मनसीति यावत् । त्वत्पादपद्मयोः वीक्षणवशात् सदाध्यानानुरोधादित्यर्थः । पद्मयोः ईक्षणं यस्येति व्युत्पत्त्या उक्तन्यायेन पद्मेक्षणो भवति । न तु पद्मे इव ईक्षणे यस्येति व्युत्पत्तेरिति भावः । तथा सुधियः बुधाः यत्पद्मायाः श्रीदेव्या अर्चनं पूजनं । दारिद्र्यं विद्रावयतीति दारिद्र्यविद्रावणं दारिद्र्यनाशकं आमनन्ति अभ्यस्यन्तिं पुनः पुनः कथयन्तीत्यर्थः । म्ना

अभ्यास इत्यस्माल्लटि पाग्घाष्मास्थेत्यादिना मनादेशः । तत् दारिद्र्यनाशकत्वेन बुधसम्मतं पद्मार्चनमपि त्वत्पादपद्मार्चनमेव भवति पद्मार्चनं दारिद्र्यनाशकमिति । अत्र पद्मार्चनं न श्रीदेव्यर्चनं किन्तु नामैकदेशग्रहणन्यायेन त्वत्पादपद्मार्चनमेव मुख्यतया दारिद्र्यनाशकमित्यर्थः । रूपकालङ्कारः । निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रकल्पनमिति लक्षणान्निरुक्तिरलङ्कारः । तयोश्च संसृष्टिः ॥

पादन्ते सरसीरुहद्रुहमिमं यत्सेवते पद्मभू-
र्नूनं तत्स्वनिवासपङ्कजवरश्रीलंघनाशङ्कया ।
गोविन्दोपि च वारिराशिदुहितुर्वासाब्जबाधाभिया
स्वस्यैवाग्रकरोद्गृहीतकमलत्राणाभिलाषेण वा ॥ ९ ॥

ब्रह्मविष्णुसेव्यत्वं प्रकटयन् श्रीपादं स्तौति । पादमिति—हे देवि पद्मभूः ब्रह्मा सरसीरुहाय द्रुह्यतीति सरसीरुहद्रुद् पद्मद्वेषी तं पद्मादपि मनोहरमित्यर्थः । ते तवेमं पादं सेवते भजत इति यत् तत् स्वस्य ब्रह्मणः निवासस्य पङ्कजवरस्य पद्मोत्तमस्य श्रियः शोभायाः लंघनात् अतिक्रमणात् आशङ्कया नूनं भयेन किमु निष्पन्नमिति शेषः । च किञ्च गोविन्दः विष्णुरपि वारिराशिदुहितुः लक्ष्म्याः स्वप्रियाया वासाब्जस्य निवासभूतस्य पद्मस्य बाधायाःपद्मद्वेषि त्वत्पादपद्मकृतायाः पीडायाः सकाशात् भिया भयेन स्वस्यात्मन एवाग्रं चासौ करश्चेति समानाधिकरणसमासः अत एव

हस्ताम्रमहस्तयोः गुणगुणिनोरभेदादिति वामनः । तेन उद्गृहीतं उद्धृत्य धृतं यत् कमलं पद्मं तस्य त्राणे पद्मद्वेषित्वत्पादकृतबाधायाः रक्षणे अभिलाषेण इच्छया वा नूनं ते तव पादं सेवते। अत्र स्वाभाविके भक्त्यादिकृते वा ब्रह्मविष्णुकृतदेवीपादसेवने अहेतोः पद्मविशेषश्रीलंघनशङ्काबाधाभयादेः हेतुत्वेनोत्प्रेक्षणात् हेतूत्प्रेक्षात्रयम् ॥ ५ ॥

सेवन्ते कुलसम्पदे नखमयाश्शीतांशवस्त्वत्पदं
तत्पाको ननु वीक्ष्यते हि नितरामन्येषु शीतांशुषु ।
एको बालक एव मौलिमयि ते यातो ललाटात्मता-
मन्यो निर्मलगण्डमण्डलदशामन्यौ तु धन्यौ गतौ ॥

देवीपादनखादिरूपान् मकुटचन्द्रकलया सह अनेकान् चन्द्रान् कल्पयित्वा सजातीयत्वात् तेषां कुलं च एकं कल्पयित्वा तत्र च केषांचित् पादभजनेनान्येषामुत्तमस्थानप्राप्तिवर्णनमुखेन नखशोभां वर्णयन् श्रीपादं स्तौति । सेवन्त इति—नखा एव नखमयाः शीतांशवः चन्द्राः कुलस्य स्ववंशस्य स्वकुलीनानामित्यर्थः । ऐश्वर्याय त्वत्पादं सेवन्ते भजन्ते । हि यस्मात् कारणात् तस्य सेवनस्य पाकः परिणामः फलमिति यावत् । अन्येषु शीतांशुषु स्वकुलीनेषु चन्द्रेषु नितरां वीक्ष्यते ननु दृश्यत एव । तद्दर्शनमुपपादयति । एक इति— अयि देवि एकः चन्द्रः बालक एव सन् ते मौलिं किरीटं यातः प्राप्तवान् । चूडा किरीटं केशाश्च

संयता मौलयस्त्रय; इयमरः । अन्यः ललाटात्मतां फालरूपतां यातः । धन्यो भाग्यवन्तौ अन्यौ शीतांशु तु ते निर्मलौ यौ गण्डमण्डलौ तयोः दशां अवस्थां तत्त्वमित्यर्थः गतौ प्राप्तवन्तौ । रूपकालङ्कारः । तत्संसृष्टा चेयं प्रस्तुतनखवृत्तान्तवर्णनेन सारूप्यात् अप्रस्तुतकुलीनवृत्तान्तप्रतीतिनिबन्धना समासोक्तिः ॥ १०

घोरं पादसहस्रकं प्रकटयन्नाशासु भासांपति-
र्ध्वान्तन्नो पुनरान्तरं शमयितुं शक्नोति शैलात्मजे ।
त्वत्पादद्वितयेन कोमळतरेणानेन चेतःस्पृशा
जन्तूनां बहिरन्तरन्धतमसं कृन्तस्यनन्तं शिवे ॥

अज्ञाननाशकत्वेन श्रीपादं स्तौति । घोरमिति—हे शैलात्मजे श्रीपार्वति भासांपतिः सूर्यः । घोरं दारुणं दुस्सहमित्यर्थः । पादानां रश्मीनां चरणानां च सहस्रमेव सहस्रकं आशासु दशसु दिक्षु प्रकटयन् स्पष्टं कुर्वन् आन्तरं तमः मानसिकं अज्ञानं शमयितुं नाशयितुं नो शक्नोति न शक्तो भवति । किन्तु अन्धकारात्मकं बाह्यमेव तमः शमयितुं शक्नोतीति भावः । हे शिवे त्वं कोमळतरेणातिमृदुलेनानेन त्वत्पादद्वितयेन तव पदद्वयेन चरणद्वयेन न तु सूर्यवत्पादसहस्रेणेतिभावः । करणेन जन्तूनां प्राणिनां चेतस्पृशा सुन्दरेण हृदयस्थितेन च सता अनन्तं न विद्यते अन्तः इतरेण नाशः यस्य तत् अनन्तमपि जन्तूनां बहिः बहिर्भागे अन्तः अन्तर्भागे च स्थितिं अन्धयतीति अन्धं च तत्

तमश्चान्धतमसं गाढं अज्ञानं अन्धकारं च कृन्तसि छिनत्सि नाशयसीत्यर्थः । कृती च्छेदने इत्यस्मात् कर्त्तरि लटि सिपि तुदादित्वाच्छेशे मुचादीनां इति मुम् । अत्र सूर्यपादसहस्रापेक्षया देवीपादद्वयस्यान्तरतमोनाशकत्वरूपविशेषवर्णनात् व्यतिरेकालङ्कारः ॥ ११ ॥

सूर्येन्द्वग्निसमीरणादिसकलस्वर्वासिनामुन्मद-
स्सर्वाण्येव पदानि यो मथितवान् दुर्वारशौर्योष्मणा ।
तं घोरम्महिषासुरं निजपदेनैकेन सम्मृद्नती
यत्त्वं प्रत्यकृथास्ततः किमपरं त्वद्वैभवं ब्रूमहे ॥ १२ ॥

महिषासुरमर्दनकरणत्वेन श्रीपादं स्तौति । सूर्येति—उन्मदः उत्कटगर्वः यो महिषासुरः सूर्येन्द्वग्निसमीरणादीनां आदित्यचन्द्रवह्निवाय्वादीनां सकलानां सर्वेषां स्वर्वासिनां देवानां संबन्धीनि सर्वाण्येव पदानि स्थानानि दिव्यवस्तूनि च दुर्वारस्य वारयितुमशक्यस्य शौर्यस्य पराक्रमस्य ऊष्मणा अतिशयेन करणेन मथितवान् मर्दितवान् नाशितवानित्यर्थः । हे देवि त्वं घोरं भयङ्करं तं महिषासुरं एकेनाद्वितीयेन निजेन स्वीयेन पदेन चरणेन सम्मृद्नती सम्मर्दं कुर्वती प्रत्यकृथाः प्रत्यकरोः प्रतीकारं कृतवतीति यत् ततः तस्मात् सूर्यादिसकलदेवसर्वपदमथनकर्तुः एकपदेन मथनेन वैरशुद्धिकरणात् अपरमन्यत् किं तव वैभवं

वयं ब्रूमहे वर्ण्यामः । एतत् त्वयैव साध्यमिति भावः । अत्र देवपदमथनकर्त्तुर्म्माहिषासुरस्य पदेनैव मर्द्दनमनुरूपमिति वर्ण्यनात् समालङ्कारभेदः । समं स्याद्वर्ण्यनं यत्र द्वयोरप्यनुरूपयोरिति लक्षणात् समश्लेषसङ्कीर्णः ॥ १२ ॥

एकं वामतयैव दक्षिणतयैवान्यत्पदं देहिनां
ख्यातं मुक्तिपुराधिवासिनि शिवे चित्रं त्वयि त्वीदृशम् ।
आनम्रेषु जनेष्वभीष्टकरणे पादावुभौ दक्षिणा-
वानम्रे तु कृतागसि स्मरहरे वामाक्षि वामावुभौ ॥

भक्ताभीष्टदातृत्वेन श्रीपादं स्तौति । एकमिति—देहिनां द्विपदां मनुष्यादीनां एकं पदं चरणं वामतयैव सव्यत्वेनैव ख्यातं अन्यत्पदं दक्षिणतयैव अवामतयैव ख्यातं प्रसिद्धं भवति । हे मुक्तिपुराधिवासिनी मुक्तिक्षेत्रस्थे शिवे पार्वति त्वयि विषये तु पदं त्वत्सम्बन्धिपदन्तित्यर्थः । ईदृशं वक्ष्यमाणप्रकारं भवति चित्रं आश्चर्यम् । ईदृशत्वमेवाह । आनम्रेष्विति—हे वामाक्षि सुन्दरनेत्रे तव उभौ पादौ आनम्रेषु आनतेषु जनेषु अभीष्टानां कामितानां करणे दाने दक्षिणौ उदारौ अवामौ च भवतः । तथा कृतं आगः गङ्गासङ्गाद्यपराधः येन तस्मिन् अत एव आनम्रे क्षमापणार्थं आनते स्मरहरे शिवे तु उभौ पादौ वामौ प्रतिकूलौ अद-

क्षिणौ च भवतः । एतच्चित्रमिति भावः । अत्र उभयोः पादयोः दक्षिणत्वस्य वामत्वस्य च प्रतीयमानविरोधस्य श्लेषेण परिहारात् विरोधाभासोऽलङ्कारः ॥ १३ ॥

आनम्रस्य पुरद्रुहश्शिरसि ते पादाब्जपातश्शिवे
जीयाद्येन बभूव पङ्कजवती मौलिस्रवन्ती क्षणम् ॥
किञ्चोदञ्चितबालपल्लववती जाता जटावल्लरी
लाक्षापातवशेन सान्ध्यसुषमासान्द्रा च चान्द्री कला ॥

सौभाग्यं वर्णयन् अष्टभिः श्रीपादं स्तौति । आनम्रस्येति— हे शिवे आनम्रस्य स्वपादयोः आनतस्य पुरद्रुहः शिवस्य शिरसि उत्तमाङ्गे ते तव पादाब्जस्य पातः पतनं नमस्कारेणापि मानाशमनात् शिरसि पादेन ताडनादितिभावः । एतेन देव्या भगवति अनुरागातिशयो व्यज्यते । जीयात् जयतु उत्कर्षं प्राप्नोतु । आशिषिलिङ् । पादाब्जपातं विशिनष्टि येनेत्यादिना—येन तव पादाब्जपातेन हेतुना पुरद्रुहः मौलिस्रवन्ती गङ्गा क्षणं अत्यन्तसंयोगे द्वितीया । पङ्कजवती पद्मवती बभूव त्वत्पादस्य पद्मत्वादितिभावः । अत एव रूपकालङ्कारः । किञ्च येन पुरद्रुहः जटा एव वल्लरी लता जटावल्लरी क्षणं बालपल्लववती नूतनप्रवाळवती जाता पूर्ववद्रूपकालङ्कारः । तथा चन्द्रस्येयं चान्द्री कला च मौलिस्थेति भावः । लाक्षायाः त्वत्पादरञ्जितस्य यावकस्यपातस्यवशेनानुसारेण हेतुना सान्ध्यया सन्ध्यासंबन्धिन्या सुषमया परमशोभया सान्द्रा नि-

विडा रक्तेत्यर्थः । जाता अत एव तद्गुणालङ्कारः । किञ्च देव्यास्सौभाग्यगुणेन शिवशिरःस्थगङ्गादीनां पङ्कजवत्वादिगुणवर्णनेन उल्लासालङ्कारः । स च पूर्वोक्तरूपकादिसङ्कीर्णः॥ १४ ॥

दृष्ट्वा रात्रिषु चन्द्रपादजनितां पाथोरुहाणां व्यथां
देवि त्वं करुणाकुलेव कुरुषे तद्वैरनिर्यातनम् ।
मानानम्रमहेशमौलिवलभीवासस्य शीतत्विषो
नित्यं पङ्कजपादघातजनिता बाधा यदादीयते ॥ १५ ॥

दृष्ट्वेति— हे देवि त्वं रात्रिषु पाथोरुहाणां पद्मानां चन्द्रस्य पादैः रश्मिभिः । पादाभ्यां चरणाभ्यां च जनितां उत्पादितां व्यथां बाधां दृष्ट्वा करुणया दयया आकुला परवशेव सती तस्याः व्यथायाः वैरनिर्यातनं प्रतीकारं कुरुषे विधत्से । वैरशुद्धिः प्रतीकारो वैरनिर्यातनञ्च इत्यमरः । तदेवाह मानेति—यद्यस्मात् कारणात् मानेन देव्या ईर्ष्याकृतकोपेन हेतुना आनम्रस्य तदपनयनार्थं आनतस्य महेशस्य शिवस्य वलभी चन्द्रशालेव मौलिः संयतकेशः जटाभारः इति यावत् । वासो यस्य तस्य तथोक्तस्य । शुद्धान्तेवलभीचन्द्रशाले सौधोर्ध्ववेश्मनीति रभसः । शीतत्विषः चन्द्रस्य नित्यं सदा पङ्कजे इव पादौ चरणौ पङ्कजानां पादौ च ताभ्यां घातः हननं तेन जनिता बाधा व्यथा आधीयते निधीयते क्रियत इत्यर्थः । अत्र चन्द्रपादजनितनैशपद्मबाधारूपकारणस्य कार्यत्वेन वर्णितायाः पद्मपादजनितचन्द्रबाधायाः सारूप्यात्

समालङ्कारः । स च पादशब्दश्लेषमूलकः उत्प्रेक्षासङ्कीर्णश्च सारूप्यमपि कार्यस्य कारणेन समं विदुरिति समालङ्कारलक्षणम् ॥ १५ ॥

सम्भ्रान्तिस्तव देवि सा विजयते मानावनम्रे शिवे
त्वत्पादांबुरुहप्रहारमुदिते मन्दं समुत्थायिनि ।
लाक्षारागरसारुणं निपतितं गङ्गापयश्शीकरं
दृष्ट्वा शोणितशङ्क्या तरळिता कान्तं यदालम्बथाः ॥

सम्भ्रान्तिरिति— हे देवि तव सा सम्भ्रान्तिः सम्भ्रम विजयते सर्वोत्कर्षेण वर्तते । सम्भ्रान्तिमेवाह मानेति— मानेन देव्या ईर्ष्या कोपेनावनम्रे आनते शिवे तवपादाम्बुरुहेण यः प्रहारः ताडनं तेन मुदिते सन्तुष्टे अत एव मन्दं समुत्थायिनि समुत्तिष्ठति सति त्वं लाक्षात्वत्पादानुलिप्तः अलक्तः सैवरागः रञ्जनद्रव्यं तस्य रसः तन्मिश्रं जलं तेनारुणं रक्तं निपतितं शिवशिरसो नितरां गलितं गङ्गायाः पयसः शीकरं कणं । शीकरोंबुकणा स्मृता इयमरः । करिकलभादिवत् प्रयोगः दृष्ट्वा शोणितशङ्क्या पादप्रहारक्षतशिवशिरस्युतरक्तभ्रान्त्या तरळिता प्रचलिता सती कान्तं प्रियं शिवं यत् यस्याः सम्भ्रान्तेः हेतोः आलम्बथाः । आलिङ्गितवत्यभूः । अत्र गङ्गाजलकणे रक्तभ्रान्तिवर्णनात् भ्रान्तिमदलङ्कारः । स च तद्गुणसङ्कीर्णः ॥ १६ ॥

सा पादद्वितया हतिर्जयति ते यस्यां गिरीन्द्रात्मजे
प्राचीनेन्दुयुते नखेन्दुदशके मौलिस्थली सङ्गते ।
स्वस्यैकादशमूर्तिता समुचितानेकादशैवोडुपा-
नाबिभ्राण इवा बभौ स भगवानेकोपि रुद्रस्वयम् ॥

सेति हे गिरीन्द्रात्मजे श्रीपार्वति सा ते तव पादद्वितयेन चरणद्वयेना हतिः अपराधक्षमापनार्थं आनते भगवच्छिरसि आघातः । जयति सर्वोत्कर्षेण वर्तते । तां पिशिनष्टि यस्यामिति यस्यां पादद्वितया हत्यां सत्यां सः प्रसिद्धो भगवान् ऐश्वर्यादि षड्गुणपरिपूर्णो रुद्रः स्वयमेकोपि सन् प्राचीनः पुरातनो य इन्दुः स्वचूडागतश्चन्द्रः तेन युते नखानामेव इन्दूनां दशके एकादशसु चन्द्रेष्वित्यर्थः । मौलिस्थलीसंगते चूडादेशस्थिते सति स्वस्यात्मनः रुद्रस्य एकादशमूर्तयो यस्य तस्य भावः । एकादशमूर्तिता तस्याः समुचितान् युक्तान् परिचितान् वा एकादशैव उडुवान् एकादशापि चन्द्रानि यर्थः । आबिभ्राण इव दधान इवा बभौ स्वस्यैकादशमूर्तिता प्रकटनार्थं एकादशचन्द्रान् बिभ्राण इव रेजे । रूपकोत्प्रेक्षयोस्सङ्करः ॥ १७ ॥

किं वैरिञ्चकरोटिकोटिनिहतं किं वा फणिग्रामणी
निश्वासानिल(हति)खेदितान्विदामितिप्रेमार्द्रसल्लापिना ।

मानस्योपशमे करेणशनकैरामृद्नता शम्भुना
भूयश्चुंबितमम्बुजद्युतिपदं ध्यायामि माये तव ॥ १८॥

किमिति— हे माये शम्भुना शिवेन मानस्य देव्या ईर्ष्यकोपस्य उपशमे उपशान्तौ कृते सति पादप्रणामेन भाव: । हे पार्वति इदं तवपदं विरिञ्चस्य ब्रह्मण: इयं वैरि चीयाकरोटि: शिरोस्थितस्या: शिरोस्थनिकरोटि स्त्रीत्यमर: कोट्या अग्रेण निहतं अभिहतं पीडितमिति यावत् । भवति किं ब्रह्मशिर: करोटे: शिवशिरस्थिनि: । (शम्भो: ब्रह्मकपालकन्दरपरिस्पन्दोत्कूणा: पातुव: । इत्यत्र भवभूतिना वर्ण्णितेतिबोध्यम् । वा अथवा इदं तु तवपदं फणिग्रामण्य: सर्पराजस्य वासुके: निश्वासानिलेन फूत्कारवायुना खेदितं व्यथितम्— ण्यन्तात् कर्मणिक्त: । निश्वासाहतीत्यपि पाठ: । भवति किं इत्येवं प्रेम्णा स्नेहेनार्द्र यथा तथा सल्लपतीति तथोक्तेन । करेण हस्तेन करणेन शनकै: आमृद्नता मर्दनं कुर्वता च सता भूयं चुम्बितं अम्बुजद्युति तव पदं अहं ध्यायामि । अत्र ब्रह्मकरोटि कोटिहननादिशङ्कया शम्भुकर्तृकपादसंवाहनादे: वर्णनात् तस्य देव्यां प्रेमातिशयो व्यज्यते। सन्देशालङ्कार: ॥ १८ ॥

पूर्वं जह्नुसुता सकृन्मुरारिपो श्रीपादसंक्षाळना
पुण्यादीदृशवैभवासमभवत् गोविन्दवन्द्ये शिवे ।

सेयं सम्प्रति शम्भुमौलिनिलयामानप्रसङ्गानतौ
नित्यं त्वच्चरणावसेचनभुवा पुण्येनकीदृक्भवेत् ॥१९॥

पूर्वमिति— हे गोविन्देन विष्णुनापि वन्द्ये शिवे पार्वति पूर्वं वामनावतारसमये जह्नुसुता गङ्गा सकृत् एकवारं मुरारिपोः विष्णोः श्रीपादस्य शोभासहितचरणस्य । मध्यमपदलोपि समासः । संक्षाळनया सम्यक्क्षाळनेन यत् पुण्यं सुकृतं तस्माद्धेतोः ईदृशं दृश्यमानप्रकारं वैभवं माहात्म्यं सकलपापसंहारकत्वरूपं ययाः सा ईदृशवैभवा समभवत् शम्भुमौलिनिलया सा इयं गङ्गासम्प्रतीदानीं मानप्रसङ्गेन देव्या ईर्ष्या कोपसङ्गत्या बन्धेन या आनतिः शम्भुकृतः प्रणामः । तस्यां सत्यां नित्यं सदा त्वच्चरणस्यावसेचनात् संक्षाळनात् भवतीति तत्भुवा तज्जातेन कीदृक् कीदृशी कीदृग्वैभवेत्यर्थः । भवेत्— यस्याः यद्वन्दनकर्तुः अल्पकालिकसंसर्गेणापि निरतिशयं वैभवं जातं तस्याः तद्वन्दनकर्मणः अधिककालिकसंसर्गेण निरतिशयं वैभवं जायत इति किमुक्तव्यमिति भावः । अत एवार्थापत्तिरलङ्कारः । कैमुत्येनार्थसांसिद्धिः काव्यार्थावतिरिष्यते इति लक्षणात् ॥ १९ ॥

पूर्वं व्याकरणप्रपञ्चनविधौ लब्ध्वाप्यनेकं पदं
किन्नो तृप्तिमगादगाधिपसुते शेषः फणिग्रामणीः ।
आलीनश्शशिमौलि मूर्द्धनि चिरं प्रेमप्रकोपानतौ
लब्धुं ते पदमेकमेव कुतुकी नित्यं यतो वर्त्तते ॥ २० ॥

पूर्वमिति— फणिग्रामणी: सर्पराज: शेष: पतञ्जलिरूपेणावतीर्ण: अनन्त: पूर्वं पुरा व्याकरणस्य पाणिनीयव्याकरणस्य प्रपञ्चनविधौ विस्तारकरणे भाष्यनिर्माण इति यावत् सति अनेकं बहुपदम् । सुप् तिङन्तरूपं लब्ध्वाप्राप्यापि तृप्तिं अलम्भावं नो अगात् नो गच्छन् किं यत: यस्मात् कारणात् दे अगाधिपसुते शेष: (ते एकं पदं चरणं स) प्रेमप्रकोपेनानतौ भगवत्कृते प्रणामे ते एकं पदं चरणं सुप् तिङन्तरूपं च एव लब्धुं कुतुकी उत्सुक: अत एव नित्यं शशिमौले: शिवस्य मूर्द्धनि शिरसि आलीन: स्थित: चिरं वर्तते अत्र उत्तरवाक्यार्थस्य पूर्ववाक्यार्थं प्रति हेतुवान् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कार: । स च तृप्त्यभावोत्प्रेक्षयाश्लेषेण च सङ्कीर्यते ॥ २० ॥

तिष्ठन्त्यां प्रणयप्रकोपवशतो बाष्पाकुलाक्ष्यां त्वयि
श्रीकण्ठे नखदर्पणप्रतिफलद्रूपे पुरोवर्त्तिनि ।
पादाग्रे पतितोयमित्यभिहिते सख्या तवालोकनं
लोलंपादतले विभाति सहसा सा कोपमाळीमुखे ॥२१॥

तिष्ठन्त्यामिति — हे देवि त्वयि भवत्यां प्रणयेन य: प्रकोप: अन्यासङ्गज्ञानजनितो रोष: । तस्य वशत: अनुसारात् बाष्पाकुलाक्ष्यां अन्यासङ्गज्ञानजनितदु:खेन अश्रुपूर्णलोचनायां तिष्ठन्त्यां तूष्णीं भवन्त्यां सख्यां तथा पुरोवर्तिनि अग्रभागवर्तमाने

श्रीकण्ठे शिवे दर्पणा इव नखाः त्वत्पादनखराः तेषु प्रतिफलद्रूप प्रतिबिम्बितमूर्तौ सति तथा सखी वयस्यया हे देवि अयं श्रीकण्ठः पादाग्रे त्वच्चरणाग्रे पतितः पतितवान् कर्तरिक्तः । त्वत्कोपशान्त्यर्थं पादयोः प्रणत इत्यभिहिते उक्ते सति पादतले स्वचरणदेशे विषये लोलं पादप्रणतप्राणनाथदर्शनार्थं पूर्वं सतृष्णं पश्चात् आलीमुखे भर्तृप्रणामदक्षसखीवदने सहसा अविमृश्येत्यर्थः । सहसेत्याकस्मिका विमर्शयोरिति गणव्याख्याने स्वरादिपाठादव्ययं नखप्रतिबिम्बित भर्तरि सख्यास्सत्य भर्तृभ्रान्त्यादिकमनालोच्येत्यर्थः । आकोपेन ईषत्कोपेन सह वर्तत इति सा कोपं तवालोकनं दर्शनं विभाति शोभते । अत्र देवी क्षणस्य विषयभेदेन लोलत्व सकोपत्वाभ्यां उल्लेखनादुल्लेखालङ्कारः ॥२१॥

कान्तालोकनलज्जयाविनमितेकान्ते मुखांभोरुहे
यासौ भूतलपातुकानयनयोश्शोभातवा भासते ।
सा तावत्तरुणारुणांबुजयुगभ्रान्त्या त्वदंघ्रिद्वय-
प्रान्ते भाति मरन्दपानकुतुकभ्रान्तेव भृङ्गावली ॥

लज्जया भगवत्यानुरागं वर्णयन् श्रीपादं स्तौति । कान्तेति — कान्ते सुन्दरे तव मुखाम्भोरुहे वदनारविन्दे कान्तस्य प्रियस्य शिवस्य पुरोवर्तिनः आलोकनेन दर्शनेन या लज्जा तया विशेषेण नमिते नम्रीकृते सति भूतले पातुकापराधालुः तव नय-

नयोः सम्बन्धिनी या असौ शोभा कान्तिः नीलप्रभेति यावत् । आभासते आभाति त्वदंघ्रिद्वयप्रान्ते तव चरणयुगसमीपे वर्तमाना सा तव नयनशोभा तरुणारुणांबुजयुगभ्रान्त्या नवीनरक्तारविन्दभ्रमेण तावदित्यवधारणे मरन्दपानकुतुकेन कौतुकेन भ्रान्ता सञ्चारिणी भृङ्गावलीव भूनरपाङ्क्तिरव भाति । उत्प्रेक्षा भ्रान्तिमतोस्सङ्करः ॥ २२ ॥

किं ब्रूमः कुटिलात्मकोपि कबरीभारस्त्वदीयश्शिवे
केळीविश्लथितस्तनोति यदयं त्वत्पादसंस्पर्शनम् ।
तद्भूयस्सुमनोगणादृतगुणस्त्वन्मौलि संलाळयता-
न्धत्ते चित्रमसौ त्वदंघ्रिभजनात् किं केन नो लभ्यते ॥

देवीपादयोराश्रितवात्सल्यादिनेकान् गुणान् वाग्भंग्या व्यञ्जयन् श्रीपादं स्तौति । किं ब्रूम इत्यादिना— (किमिति) हे शिवे पार्वति । कुटिलात्मको वक्ररूपो वक्रस्वभावश्चापि त्वदीयोयं कबरीभारः बन्धरचना विशिष्टकेशभरः । केळया कन्दुकादिक्रीडया विश्लथितः स्रस्तबन्धस्सन् यत् यस्मात् कारणात् त्वत्पादयोस्संस्पर्शनं सम्यक्स्पर्शं एवं यादृच्छिकमपीत्यर्थः । तनोति करोति तत् तस्मात् कारणात् असौ कुटिलात्मकोपि त्वदीयकबरीभारः सुमनोगणैः पुष्पवृन्दैः हेतुभिः देववृन्दैः कर्तृभिश्च आदृतः गुणो येन यस्य च स तथोक्तस्सन् भूयः पुनः त्वन्मौलिना संलाळयतां सम्यक् लाळयतां आदरणीयतां धत्ते दधाति

लालनीयो भवतीत्यर्थः । चित्रमाश्चर्यं वयं किं ब्रूमः वर्णयामः वर्णनाशक्यत्वात् अनिर्वचनीयमाश्चर्यमित्यर्थः । इदं च त्वत्पादभजनमाहात्म्यलब्धमित्याह । त्वदंघ्रिभजनादिति त्वदंघ्रिभजनात् केन किं नो यद्यनेन प्राप्यते सर्वैरपि सर्वं प्राप्यत इत्यर्थः । अत्र देवीकेशसम्बन्धि यादृच्छिकपादस्पर्शस्य लालनत्वेनाध्यवसित्य देवीशिरस्थित्यहेतुत्वेपि हेतुत्वेन सम्भावनात् हेतूत्प्रेक्षा अर्थान्तरन्याससङ्कीर्णा विरोधाभाससङ्कीर्णा व्यञ्जकाप्रयोगात् गम्या च ॥ २३ ॥

रागद्वेषमुखाहिविभ्रमभरा नश्यन्ति विश्वेश्वरि
त्वत्संगादिति मुक्तिदेशनिलये मिथ्याजनैः कथ्यते ।
उद्यद्वेषमुदारविभ्रमभरं गात्रं दधत्या त्वया
रागोपि ध्रियतेधिकं चरणयोश्शोणांबुजच्छाययोः ॥२४॥

रागगुणं वर्णयन् श्रीपादं स्तौति । रागेति— मुक्तिदेशो निलयो यस्याः तस्याः संबुद्धिः हे मुक्तिदेशनिलये विश्वेश्वरि भुवनश्वरि सर्वेश्वरीति वा । विश्वं कृत्स्ने च भुवने विश्वे देवेषु नागरे इति विश्वः रागद्वेषमुखाः रागो विषयभोगेच्छा द्वेषः तद्विरोधिनि क्रोधः तौ मुखे आदौ येषां ते तथोक्ताः विभ्रमभराः भ्रान्त्यतिशयाः विभ्रमो भ्रान्ति हावयोरिति व्याख्या सुधाकरः त्वत्सङ्गात् त्वत्संसर्गात् नश्यन्तीति यासिद्धौ इति जनैः मिथ्या कथ्यते उच्यते । एतत् कथनं अनुभवविरोधादसत्यमित्यर्थः ।

तद्विरोधमेवाह उद्यदिति उद्यन् वेषः तिलकधारणादिरूपः अकल्पः यस्य तत् उद्यद्वैरं च । वैरं विरोधो विद्वेष, आकल्पवेषौ नेपथ्ये इति चामरः । उदारो महान् विभ्रमः शृङ्गारसमुद्भूतं स्त्रीणां चित्तवृत्यनवस्थानं तस्यातिशयो यस्य तत्तथोक्तं तदुक्तं चित्तवृत्यनवस्थानं शृङ्गाराद्विभ्रमो मत इति महाभ्रान्तिभरं च गात्रं शरीरं दधत्या बिभृत्या त्वया शोणांबुजच्छाययोः रक्तारविन्दकान्त्योः चरणयोः पादयोः अधिकरणे सप्तमीरागोरक्तिमा विषयेच्छा च अधिकं अत्यन्तं ध्रियते भ्रियते । अत्र पूर्ववाक्यार्थं प्रति उत्तरवाक्यार्थस्य हेतुत्वात् काव्यलिङ्गभेदः । स च रागादिशब्दे श्लेषाधीनाभेदाध्यवसाय मूलकातिशयोक्तिमपेक्षत इति सङ्करः । २४ ॥

देवि त्वत्पदसत्परागमनिशं मौलौ समा बिभ्रतां
साधूनामपरागतैव भवतीत्याश्चर्यमास्तामिदम् ।
पादस्ते नखरप्रभाबलसितो जागर्त्ति सोयं पुन-
श्चित्रं नामखरप्रभावलसितो दुष्टासुरं पिष्टवान् ॥ २५॥

भक्तानां वैराग्यावहत्वेन दुष्टनिग्राहकत्वेन च श्रीपादं स्तौति देवीति—— हे देवि मौलौ निजचूडायां अनिशं सदा त्वत्पदयोस्सम्बन्धिनं सन्तं शुभावहत्वेन समीचीनं परागं रेणुं (नि) परागः कौसुमे रेणौ स्त्रानीयादौ रजस्यपीत्यमरः । सम्यक् आसमन्तात् बिभृतां प्रणामादिना दधतां परागाणामित्यर्थः ।

साधूनां सज्जनानां अविद्यमानः परागो येषां तेषां भावः अपरागता अपगतो रागो येभ्य इति व्युत्पत्त्या वैराग्यं च एव भवति । इतीदं आश्चर्यं आस्तामिति इतोपि परमाश्चर्यस्य सत्वादिति भावः । तदेवाहपाद इति । ते तव पादः नखराणां नखानां याः प्रभाः दीप्तयः तासां बलेन वैभवेन लसितो धवळः । वबयोरभेदात् खरेण प्रभावेन लसितो न भवतीति खरप्रभावलसितश्च जागर्ति सदा भासते । सोयं पादः पुनः तु खरेण तीक्ष्णेन प्रभावेन तेजोविशेषेण लसितः शोभितस्सन् दुष्टमसुरं पिष्टवान् ममर्द चित्रं नामेति प्रसिद्धौ । अस्याश्चर्यस्य पूर्वार्द्धोक्ताश्चर्यापेक्षया परमत्वे बीजं च परागं शिरसि बिभ्रतामपरागताभवतीति पूर्वार्द्धोक्त्या सोयमित्युत्तरार्द्धोक्त्या च मूलकारेणैव स्पष्टीकृतम् । अत्र सपरागाणामप्यपरागत्वं इत्याभासमानविरोधस्यापगतरागत्वमित्यर्थेन परिहारात् एको विरोधाभासः तथा खरप्रभावलसितस्यापि पादस्य नखरप्रभावलसितत्वमित्याभासमान विरोधस्य वबयोरभेदात् नखरप्रभावलसितत्वमित्यर्थेन परिहारात् । अपरः उभयो. परस्परनिरपेक्षत्वात् संसृष्टिः ॥ २५ ॥

द्वित्वेन स्थितयोस्त्वदीयपदयोर्द्वैतं निरस्यस्फुटं
कैवल्यप्रतिपादने कुशलता जातेति कोयं क्रमः ।
किं वा युक्तिभिरत्र मुक्तिकरताव्यक्तैव ते पादयो-
र्मुक्ता एव हि विस्फुरन्ति विमलास्तत्सङ्गिनोमीनखाः॥

भक्तानां मोक्षप्रदातृत्वेन श्रीपादं स्तौति । द्वित्वेनेति— हे देवि द्वित्वेन स्थितयो: वर्तमानयो: द्वैतमङ्गीकुर्वतोरित्यर्थ: । त्वदीयपदयो: स्फुटं स्पष्टं यथा तथा द्वयोर्भावो द्विता द्वितैव द्वैतं प्रज्ञाद्यण् । तत् भेदमिति यावत् निरस्यापास्य जगतो मिथ्यात्वं साधयित्वेत्यर्थ: । कैवल्यप्रतिपादने मुमुक्षोर्मोक्षदाने कुशलता समर्थता जाता इत्ययं क्रम: प्रकार: क: दुर्ज्ञेय इत्यर्थ: । द्वैतिनो: त्वत्पदयो: द्वैतनिरासपूर्वक मोक्षदानसामर्थ्यं विरुद्धत्वादाश्चर्यमिति भाव: । नन्विदमळीकमेव युक्तिविरुद्धत्वादित्याशङ्क्यानुभवं प्रमाणयन्नाह । किं वेति अत्र त्वत्पदयो: मुक्तिदातृत्वे विषये युक्तिभि: त्वत्पदस्य मुक्तिदातृत्वमयुक्तं द्वैतित्वादित्याद्यनुमानै: किं वा भवति न किमपि प्रयोजनमित्यर्थ: । युक्ते: प्रबलस्य वक्ष्यमाणानुभवस्य सत्वादिति भाव: । अनुभवमेवाह मुक्तीति ते तवपादयो: मुक्तिकरता मोक्षदातृत्वं व्यक्ता स्पष्टा अनुभवसिद्धैव भवति अनुभवं विशदयति मुक्ता: इति हि यस्मात् कारणात् तत्सङ्गिन: त्वत्पदसक्ता: । तत् संसर्गिणश्च विमला: श्लक्ष्णा: विगतरागादिदोषाश्च अमानिखा: मुक्ता एव मौक्तिकान्येव मुक्तिं प्राप्ताश्च विस्फुरन्ति प्रकाशन्ते । अत्र द्वैतिनोर्द्वैतिपदयोरद्वैतात्मकमोक्षरूपकार्यकरता वर्णनात् विभावना भेद: । विरुद्धान कार्यसम्पत्तिर्दृष्टा काचिद्विभावनेति लक्षणात् । तथा पादयो: मुक्तिकरत्वरूपवाक्यार्थं प्रति तदुत्तरवाक्यार्थस्यहेतुत्वात् काव्यलिङ्गभेद: स च मुक्ता इत्यादि श्लेषाधीनाभेदाध्यवसायमुलकातिशयोक्ति सापेक्ष इति सङ्कर: ॥ २६ ॥

पादाग्रं तव कामदं सुरलता शाखाग्रमाचक्ष्महे
जातायत्र हि बालपल्लवरुचिस्वैरेव रागोदयैः ।
उत्सर्पन्नखमण्डलीसुषमया पुष्पाळिरुल्पादिता
सञ्जाताळिरुतिश्चमंजुळतरैर्मञ्जीरशिञ्जारवैः ॥ २७ ॥

भक्तकामदत्वेन श्रीपादं स्तौति । पादाग्रमिति— हे देवि काम्यन्त इति कामाः तान् ददातीति । कामदं इष्टदं तवपादयोरग्रं वयं सुरलतायाः कल्पवल्याः या शाखा तस्याः अग्रं आचक्ष्महे ब्रूमः । हि यस्मात् कारणात् यत्र पादाग्रे स्वैः आत्मीयैः रागोदयैः रक्तिमाभिर्भावैः बालपल्लवानां नवप्रवाळानां रुचिः कान्तिः जाता अभूत् तथा उत्सर्पन्त्याः । नखमण्डल्याः नखपङ्क्तेः सुषमया परमशोभया पुष्पाळिः कुसुमपङ्क्तिः उल्पादिता जनिता । तथा मंजुळतरैः अतिमनोहरैः मञ्जीरयोः नूपुरयोः शिञ्जारवैः शिञ्जितशब्दैः । (नि) भूषणानां तु शिञ्जिता इत्यमरः । अळिरुतिः भृङ्गशब्दश्च सञ्जाता उत्पन्ना । अत्र देवीपादाग्रस्य कल्पलताशाखाग्रत्वेन तद्गत रक्तवर्णस्य तत् प्रवाळत्वेन तन्नखप्रभायाः तत् पुष्पत्वेन तन्नूपुरशब्दस्य भृङ्गशब्दत्वेन च रूपणात् रूपकालङ्कारः ॥ २७ ॥

देवीयं तवसन्नतेशमकुटस्वर्लोककल्लोलिनी
कल्लोलाहतिभिर्विशेषविमला जीयान्नखश्रेणिका ।

यद्धावळ्यमवाप्तुमात्तकुतुकास्तोये तपस्यन्त्यमी
दीनाः फेनकणाश्चमौक्तिकगणाश्शंखाश्च शङ्कामहे ॥

भर्तृवल्लभत्वेन सौभाग्यं वर्णयन् द्वयेन श्रीपादं स्तौति । देवीति— हे देवि सन्नतस्य मानापनयनार्थं सम्यक् नतस्य ईशस्य शिवस्य मकुटे किरीटे तेन च तदाधारभूतं शिरो लक्ष्यते । या स्वर्लोककल्लोलिनी स्वर्न्नदीगङ्केति यावत् । तस्याः कल्लोलैः महावीचिभिः या आहतयः अभिघाताः ताभिः करणैः । (नि) अथोर्मिषु महत्सूल्लोलकल्लोलाविव्यमरः । विशेषेणातिशयेन विमला निर्मला तव इयं नखश्रेणिका पादनखपङ्क्तिः जीयात् जयतु उत्कर्षं प्राप्नोतु । आशिषिलिङ्— नखधावळ्यं वर्णयन् नखश्रेणीं विशिनष्टि यदिति । अमी फेनकणाः फेनानां कणाः अब्धिकफानां लवाः । (नि) हिण्डीरोब्धिकफः फेन इत्यमरः । तथा मौक्तिकगणाः मुक्तामाणिसंघाश्च तथा शंखाः कम्बवश्च कर्तारः । एते स्वतो धवळा अपि यस्या उक्त वैमल्यायाः त्वत्पादनखश्रेण्याः धावळ्यं शौक्लयं अवाप्तुं लब्धुं आत्तं स्वीकृतं कुतुकं कौतुकं इच्छेति यावत् यैः ते आत्तकुतुकाः दीनाः सदा तोयस्थित्यादि क्लेशेन दैन्ययुक्तास्सन्तः तोये समुद्रादिजले तपस्यन्तितपश्चरन्ति । रोमन्थ तपोभ्यां वर्तिं चरोरिति तपश्शब्दात् कयङ्लटि तपः परस्मैपदञ्चेति परस्मैपदं इति वयं शङ्कामहे उत्प्रेक्षामहे । वाक्यार्थः कर्मफेनाद्यतिशायि धावळ्यं त्वत्पादनखानामिति भावः ।

अत्र पूर्वार्द्धे देवीपादनखानां गङ्गावीचिताडनकृतवैमल्यासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः । तथा उत्तरार्द्धे फेनादीनां स्वाभाविक्याः तपश्चरणत्वेनाध्यवसितायाः तोयस्थितेः अहेतोर्देवीपादनखधावल्ये छायाः तद्धेतुत्वेनोत्प्रेक्षणात् हेतूत्प्रेक्षातयोश्च संसृष्टिः ॥ २८ ॥

माने शम्भुशिरः प्रहारचरितं नैवत्वदिच्छाकृतं
जाने देविपदाब्जयोस्तु पुरजिन्मूर्ध्नाविरोधादिदम् ।
एते पादनखांशुबद्धकलहाश्शीतांशुमन्दाकिनी
भोगीन्द्राःकिल शङ्करस्याशिरसा शङ्कांविना रक्षिताः ॥

मान इति — माने अन्यासङ्गज्ञानकृते देव्या ईर्ष्या कोपे तदपनयनार्थं नतस्य शम्भोः शिरसि यः प्रहारः पादाभ्यां ताडनं तावतापि कोपाशमनादिति भावः । स एव यच्चरितं तव चरित्रं तत्कर्म । अहं त्वदिच्छाकृतं नैव जाने वेद्मि— तव शम्भुशिरसा विरोधाभावादिति भावः । तु किन्तु इदं पूर्वोक्तं शम्भुशिरःप्रहाररूपं त्वच्चरितं कर्मपादाब्जयोः त्वच्चरणारविन्दयोः पुरजिन्मूर्ध्ना शिवशिरसा सह विरोधात् वैरात् जातं जाने अनुचितः नत शिवशिरःप्रहारः त्वदिच्छाकृतो न किन्तु वक्ष्यमाण हेतुना शिवशिरोविरोधित्वात् पादाब्जेच्छाकृत इत्यहं जान इत्यर्थः । विरोधमुपपादयति । एत इति— शङ्करस्य शिरसा कर्त्रा पादनखांशु-

भिः देवीपदनखरश्मिभिस्सह बद्धकलहाः शौक्ल्यगुणमत्सरेण कृतयुद्धाः । एते शीतांशुमन्दाकिनी भोगीन्द्राः चन्द्रगङ्गाजलसर्पराजाः युद्धे पराजिताः दूरं पलाय्य क्वचिद्विश्रामामिच्छन्त इति भावः । शङ्कां विना एतद्रक्षणे देवीपादयोः कोमस्यान्नवेति संशयं विना रक्षिताः स्वास्मिन् धारणेन पालिताः किल । अत्र उत्तरवाक्यार्थस्य पूर्ववाक्यगतविरोधपदार्थं प्रतिहेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । तथा पादकृत शम्भुशिरःप्रहारस्य मानानुपशमकृतस्या हेतोरुक्त शम्भुशिरोविरोधस्य हेतुत्वेनोत्प्रेक्षणात् हेतूत्प्रेक्षा । सा च देवीच्छाकृतत्वनिह्नवपूर्वकत्वान् सापह्नवा ॥ २९ ॥

देवि त्वच्चरणोच्चलन्नखमणिश्रेणीषु लीनोनम-
न्नाभातिस्फटिकाचलस्फुटतटीशायीव सायन्नटः ।
हंसालीनवपुस्वयं कमलभूः क्षीराब्धिशायीव च
श्रीभर्त्ता मघवापि नाकसरसिस्नायन्निवालोक्यते ॥३०॥

त्रिमूर्त्यादिवन्द्यत्वं वर्णयन् श्रीपादं स्तौति । देवीति—हे देवि सायं प्रदोषसन्ध्यायाम् । सायमिति मान्तमव्ययं नटः शिव इति यावत्, सोयं नट इत्यपि पाठः । नमन् नमस्कारं कुर्वन अत एव चरणयोः पदयोः तदंगुलीष्वित्यर्थः । उच्चलन्त उत्गच्छन्तः ये नखा एव मणयः मुक्ता रत्नानि तेषां श्रेणीषु पङ्क्तिषु विस्मर तत्प्रभापटलेष्वित्यर्थः । लीनः सङ्गतः कोचित्तु-

नखमणिश्रेणीष्वित्यस्य शक्यार्थमेवाङ्गीकृत्य लीनइत्यस्य प्रतिफलित इति पर्यवसितार्थमाहुः । अत एव स्फटिकाचलस्य स्फटिक पर्वतस्य हंसेत्याद्युत्तरानुरोधात् कैलासस्यसम्बन्धिनी स्फुटा स्फष्टा सिता वा तटी उपरिप्रदेशः तस्यांशेत इति तच्छायीवेत्युत्प्रेक्षा । (नि) स्फुटोव्यक्तप्रफुल्लयोस्सिते व्याप्ते इति हैमः । स्फुटिकाचलस्येति पठित्वा रजतगिरेरिति केचिद्व्याचक्षते । आभाति शोभते तथा कमलभूः नमन् त्वच्चरणोच्चलन्नखमणिश्रेणीषु लीनः अत एव स्वयं हंसे वाहनभूतेमराळे धवळवर्णे आलीनं मिळितं वपुः शरीरं यस्य सः हंसा लीनवपुः इवेत्यनुकृष्यते । हंसशायीवेत्यर्थः आभाति तथा श्रीभर्त्ता विष्णुश्च नमन् त्वच्चरणोच्चलन्नख मणिश्रेणीषु लीनः । अत एव क्षीराब्धौ क्षीरसमुद्रे शेत इति क्षीराब्धिशायी वा भाति तथा मघवा इन्द्रोपि नमन् त्वच्चरणोच्चलन्नखमणिश्रेणीषु लीनः । अत एव नाकसरसि स्वर्गगायां धवळजलायामिति भावः । मानससरसीति केचित् स्नायन् स्नानं कुर्वन्निवालोक्यते वीक्ष्यते देवजनैरिति शेषः । कर्मणि लट्— अत्रोत्प्रेक्षाचतुष्टयं तासाञ्च परस्परानिरपेक्षत्वात् संसृष्टिः ॥ ३० ॥

डोळाकेळिविधौ हिमाचलशिलादेशे समभ्याहतात्
पादाग्रात्तव यानि यावकरसप्रस्यन्दनान्यम्बिके ।
तान्यभ्यागतसुम्भसङ्गरभवद्रक्ताम्बुविस्तारणा
बिन्दुक्षेपनिभानिनन्ददमरीवन्द्यानि वन्दामहे ॥ ३१ ॥

देव्या डोळाकोळिं वर्णयन् श्रीपादं युग्मेन स्तौति । डोळेति— हे अम्बिके पार्वति तव डोळायां या केळिः क्रीडा तस्याः विधौ विधाने . हिमाचलशिलादेशे हिमवत्पर्वतपाषाणस्थले । समभ्याहतात् संघट्टितात पादयोरग्रात् सकाशात् । यानि यावकरसप्रस्यन्दनानि लाक्षायुक्तजलस्रवणानि पादाग्रस्रुतयः लाक्षारसबिन्दव इत्यर्थः । अभूवन्निति शेषः । अभ्यागतस्य युद्धार्थं अभिमुखमागतस्य सुम्भस्यासुरस्य सङ्गरे युद्धे भवन्ति जायमानानि यानि रक्ताम्बूनि शोणितरूपाणि जलानि तेषां विस्तारणानां प्रपञ्चानां ये बिन्दुक्षेपाः बिन्दव इव क्षेपाः संक्षिप्ता विन्यासा इत्यर्थः । तैस्सदृशानि तन्निभानीत्यस्वपदविग्रहः । (नि) स्युरुत्तरपदे त्वमीनिभ सङ्काशनीकाशप्रतीकाशोपमादय इत्यमरकोशात् । विस्तरिष्यमाणस्य वस्तुनः संक्षेपकथनं बिन्दुक्षेपः । तदुक्तं बीजबिन्दुपताकाख्याप्रकरी कार्यलक्षणा अवान्तरार्थविच्छेदे बिन्दुरुच्छेदकारणं इत्यादि । यथा नाटकादिषु विस्तरिष्यमाणस्य रामादिनायकचरित्रस्य पूर्वं विष्कम्भादिना संक्षेपकथनरूपो बिन्दुः प्रक्षिप्यते । तद्वद्भावि सुम्भासुरयुद्धसम्भाव्यरक्तप्रपञ्चसूचक रक्तबिन्दव इव स्थितानीत्यर्थः । नन्दन्तीभिः सुम्भासुरयुद्धतद्वधादिसम्भावनया सन्तुष्यन्तीभिः अमरीभिः देवीभिः वन्द्यानि नमस्कार्याणि तानि यावकरसप्रस्यन्दनानि वयं वन्दामहे नमस्कुर्मः । उत्प्रेक्षालङ्कारः ॥ ३१ ॥

डोळाकेळिषु यं हिमाचलशिलालग्नं वनेवासिनो
भक्त्या योगिवरास्त्रिपुण्ड्रकलिते लिम्पन्ति फालान्तरे ।
यं सिद्धप्रमदास्समेत्य तिलकं कुर्वन्ति नत्वा मुहु-
स्तं दाक्षायणि ते कदानु पदयोरीक्षेय लाक्षारसम् ॥३२॥

डोळेति — वने वसन्तीति वने वासिनः । शयवासवासिष्वकालात् इति सप्तम्या अलुक् । योगः अष्टाङ्गध्यानम् । (नि) योगस्सन्नहनोपायध्यानसंगतियुक्तिषु इत्यमरः । सः एषां अस्तीति योगिनः तेषां वराः श्रेष्ठाः ऋषिश्रेष्ठा इत्यर्थः । ते तव डोळाकेळिषु हिमयुक्तः अचलः हिमाचलः हिमवान् पर्वतः । तस्य शिलायां पाषाणे लग्नं सक्तं यं लाक्षारसं भक्त्या सह त्रिपुण्ड्रकलिते त्रिपुण्ड्रेण कलिते भस्मत्रिपुण्ड्रेण लिप्ते फालान्तरे फालमध्ये लिम्पन्ति अनुलिम्पन्ति । शेमुचादीनामिति नुम् । तथा सिद्धप्रमदाः सिद्धाङ्गनाः हिमाचलशिलालग्नं यं लाक्षारसं समेत्य प्राप्य मुहुः नत्वा भक्त्येति भावः । फालान्तरे तिलकं विशेषकं कुर्वन्ति । हे दाक्षायणि पार्वति । दाक्षायणीत्यवर्णायामश्विन्याद्युडुषु स्त्रियां इति व्याख्यासुधाकरः । ते पदयोः तं लाक्षारसं अहं कदानु ईक्षेय पश्येयं तादृशलाक्षारसदर्शनं मया प्राप्यत इत्यर्थः । अत्र लाक्षारसस्यानुलेपनत्वेन तिलकत्वेन च उल्लेखनपूर्वकं उपयोगवर्णनादुल्लेखालङ्कारः । बहुभिर्बहुधोल्लेख्यसौ विषयभेदतः । इति क्षणात् ॥ ३२ ॥

देवि त्वं मुरवैरिणः प्रणमने यत्किञ्चिदाकुञ्चय
श्रीपादांबुजमन्यथास्य शिरसि त्वत्पादलाक्षाञ्चिते ।
श्रीभूम्योरितरप्रणामकृतमित्यन्योन्यमाशङ्क्या
रोषव्याकुलयोश्चिरं स भगवान् जायेत पर्याकुलः ॥३३॥

श्री विष्णुवन्द्यत्वं वर्णयन् श्रीपादं स्तौति । देवीति— हे देवि त्वं मुरवैरिणः विष्णोः कर्तुः प्रणमने त्वत्पादनमस्कारे सति श्रीयुक्तं पादांबुजं श्रीपादांबुजं यत्किञ्चित् अल्पं आकुञ्चय आवर्जय प्रार्थनायां लोट् । विष्णुशिरसि त्वत्पादलाक्षायाः असंलग्नार्थमिति भावः । तदभावे दोषमाह अन्यथेति— अन्यथा पादांबुजाकुञ्चनाभावे अस्य विष्णोः शिरसि तव पादयोः स्थितया लाक्षया यावकेनाङ्कितो पूजिते व्याप्ते वा सति श्रीभूम्योः लक्ष्मीभूदेव्योः इतरप्रणामकृतमित्यस्य इदमित्यादिः । इदं भर्तृशिरसि लाक्षाव्यापनं इतरस्याः । भूदेव्याः लक्ष्मीदेव्याश्च प्रणामेनान्यासङ्काद्यपरावक्षमापकेन भर्तृकर्तृकेण पादनमस्कारेण कृतं जनितं संक्रान्तमिति यावत् । इत्येवमन्योन्यं प्रति आशङ्क्या श्रीदेव्याः भूदेवी नमस्कारकृतमिदमिति भूदेव्याश्च श्रीदेवी नमस्कारकृतमिदमिति भ्रमेण हेतुना यो रोषः अन्योत्कर्षबोधकप्रणामनिबन्धनः कोपः तेन व्याकुलयोः विहस्तयोरितिकर्तव्यता शून्ययोस्तयोः । (नि) विहस्तव्याकुलौ समौ इत्यमरः । सः

भगवान् विष्णु: भगोस्यास्तीति भगवान । तदुक्तं ऐश्वर्यस्य समग्रस्य धर्मस्य यशस: श्रिय: ज्ञानवैराग्ययोश्चापि षण्णां भग इतङ्गिना इति चिरं चिरकालं पर्याकुल: । स्त्रियियो: रोषव्याकुलतया तदपनयनार्थं उपायचिन्तादिना व्याकुलो जायेत भवेत् । अत: विष्णुकर्तृकनमस्कारे त्वया किञ्चित् पादांबुजाकुञ्चनं कर्तव्यमिति प्रार्थ्यत इत्यर्थ: । अत एव काव्यलिङ्गभेद: ॥ ३३ ॥

प्रागुद्वाहविधौ हिमाचलसदस्यश्माधिरोपाय य-
न्न स्प्रक्ष्यामि वियद्धुनीमिति पुनस्सत्यं विधातुं च यत् ॥
दैत्योत्पेषणसाहसे विरचिते संवाहनार्थञ्च यत्
तत्पादग्रहणत्रयं विजयते शर्वेण शर्वाणि ते ॥ ३४ ॥

सौभाग्यादिगुणं वर्णयन् श्रीपादं स्तौति । प्रागिति— प्राक् पूर्वं उद्वाहविधौ विवाहकर्मणि हिमाचलस्य हिमवत: पर्वतस्य सदसि सभायां क्रियाशालायामित्यर्थ: । य: अश्मनि शिलायां अधिरोप: । ईश्वरप्रयोजककर्तृकदेवीप्रयोज्यकर्तृकं च आरोपणं तस्मै यत् ईश्वरकर्तृकं पादग्रहणं अभूदिति शेष: । तथा पुन: विवाहानन्तरमपि अहं वियद्धुनीं गङ्गां न स्प्रक्ष्यामि स्पर्शं करिष्यामीति सत्यं विधातुं गङ्गासङ्गशङ्काकृतेर्ष्याकोपशमनार्थं शपथं कर्तुं च यत् पादग्रहणमभूत् शपथकरणस्य स्वामिपादग्रहणादिपूर्वकत्वप्रसिद्धेरिति भाव: । तथा दैत्यस्य महिषासुरस्य उत्पेषणं

मृदुना पादेन शिरःपेषणमेव साहसं दुष्करकर्म तस्मिन् विरचिते त्वया कृते सति । (नि) साहसन्तुदमेदुष्करकर्मणि अविमृश्यकृतौ धाष्ट्र्ये इति हैमः । संवाहनार्थं साहसोत्पन्नखेदना शान्त्यर्थं मृदुमर्दनार्थं च यत् पादग्रहणं अभूत् हे शर्वाणि भवानि । इन्द्रवरुणेत्यादिना ङीषि आनुगागमेण त्वं शर्वेण शिवेन कृतमिति शेषः । ते तव तत् पादग्रहणत्रयमित्येकं पदं तेषां यच्छब्दोक्तानां पादग्रहणानां त्रयं विजयते सर्वोत्कर्षेण वर्तते । विपराभ्यां जेरित्यात्मनेपदम् ॥ ३४ ॥

सुम्भस्ते किल देवि रागकलहे पादप्रहारोत्सवं
लब्धुं कांक्षितवानुपायमिह खल्वज्ञो न विज्ञातवान् ।
यद्यायोत्स्यति घोरमाहिषवपुर्द्वारी स वैरी ततः
प्राघानिष्यत मूर्ध्नि कोमळरुचा पादारविन्देन ते ॥३५॥

दुष्टनिग्रहस्वभावत्वेन महिषासुरं प्रति नित्य वैरित्वमभिप्रेत्य श्रीपादं स्तौति । सुम्भ इति— हे देवि सुम्भः सुम्भाख्योसुरः त्वदनुरक्त इति भावः । रागेण स्नेहेन यः कलहः विग्रहः विरोध इति यावत् । तस्मिन् ते तवपादेन प्रहारः शिरसि ताडनं अन्यासङ्गशङ्काकृतेर्ष्याकोपकृतमिति भावः । तमेवोत्सवं आनन्दजनकत्वादिति भावः । लब्धुं प्राप्तुं कांक्षितवान इयेष । किलेति वार्तायां अज्ञः मूढः सुम्भः इह त्वत्पादप्रहारलाभे उपायं

साधनं न विज्ञातवान् अज्ञत्वान्नविवेदखल्विन्यवधारणे । ननु कोयमुपायः यज्ञानाभावात् सुम्भा अज्ञ इति निन्दसीत्याशङ्क्य भङ्क्या तमुपायमाह । यदीति वैरी दूत्यादिनापि देवीलाभाभावेन वैरवान् द्वेषवान् सः सुम्भः घोरं भयङ्करं यन्माहिषं महिषासुर-सम्बन्धि तत्सदृशामित्यर्थः । वपुश्शरीरं तत् धरति बिभर्तीति तद्धारी सन् आयोत्स्यति त्वया सह युद्धं अकरिष्यत् यदि ततस्तर्हि ते तव कोमळरुचा मनोहरकान्तिना पादारविन्देन कर्त्रा मूर्ध्नि शिरसि प्राघानिष्यत प्राहरिष्यत । कर्मणि लृङ्— स्यासिच्सीयुट् नासिष्विल्यादिना चिञ्चत्भावे वृद्धिः कुत्वं चात्र सम्भावनालङ्कारः । सम्भावना यदीत्थं स्यादित्यूहोन्यस्य सिद्धये इति लक्षणात् ॥ ३५ ॥

आनम्रे गिरिशे पदप्रहरणे दत्ते भवत्या रुषा
नाथे किं महिषोहमित्यभिहिते देवेन तस्मिन् क्षणे ।
आळिष्वाकलितस्मितासु पुनरप्युद्दामपुष्यद्रुष-
स्तन्मौलौ जयति द्वितीयमपि ते पादाब्जसन्ताडनम् ॥

सौभाग्यं वर्णयन् श्रीपादं स्तौति । आनम्र इति— नाथे इति पदं महावाक्ये अवान्तरवाक्ये च योजनीयम् । हे नाथे स्वामिनि देवि गिरिशे शिवे आनम्रे कोपशान्त्यर्थं प्रणते सति भवत्या रुषा गङ्गासङ्गरूपापराधज्ञानज-न्यकोपेन हेतुना । (नि)

रुट्क्रुधौस्त्रियामित्यमर: । पदेन प्रहरणे शिरसि ताडने दत्ते कृते सति देवेन शिवेन हे नाथे अहं महिषोऽपि किं येन मां पादेन शिरसि प्रहृतवत्यसीति भाव: । इत्येवं अभिहिते उक्ते सति एवं नर्मोक्त्या स्वापराधापलापे कृते सतीत्यर्थ: । तस्मिन् क्षणे आलिषु प्रियसखीषु आकलितस्मितासु देवकृतस्वापराधापलापोपायनर्मवचनं श्रुत्वा कृतमन्दहासासु पुनरपि उद्दाममुच्छृंखलं यथा तथा पुष्यन्ती भर्तृकृतस्वापराधावलापेन सखीकृतमन्दहासेन च वर्द्धमाना रुट् कोप: यस्या: तस्या उद्दामपुष्यद्रुष: ते तन्मौलौ शिवचूडायां द्वितीयमपि पादाब्जेन सन्ताडनं प्रहरणं कर्तृ जयति सर्वोत्कर्षेण वर्तते । अत्रातिशयोक्तिरलङ्कार: ॥ ३६ ॥

पादाग्रं तव सङ्गरश्रमवशा दाक्षायि लाक्षारसं
विन्यस्तं मृगनायकोपरि चिराज्जीयादगेन्द्रात्मजे ।
यत्कान्त्यैव च लोहितो मृगपतिर्दैत्यप्रहारोद्गळ-
द्रक्ताम्भ:कणिकावहन्नपि तथा नामानि वैमानिकै: ॥

दुष्टनिग्रहतत्परत्वेन श्रीपादं स्तौति । पादाग्रमिति— हे अगेन्द्रात्मजे पार्वति सङ्गरश्रमवशात् युद्धपरिश्रमानुसरात् आक्षायि ईषद्विनाशी । क्षायि इत्यस्मात् णिनौ वृद्धिरायादेशश्च लाक्षारस: यावकरस: यस्य तत् आक्षायि लाक्षारसं आक्षारि लाक्षारसमिति पाठे आक्षावि लाक्षारसमित्यर्थ: । तव पादाग्रं

सङ्गरश्रमवशात् मृगनायकस्य सिंहस्य उपरि पृष्ठे विन्यस्तं अर्पितं सत् चिरात् चिरकालं जीयात् जयमुत्कर्षं प्राप्नोतु पादाग्रकान्ति-विशेषमाह । यदिति दैत्यानां असुराणां कर्तृणां प्रहारेणायुधप्रयोगेण उद्गलतां उद्गच्छतां रक्ताम्भसां शोणितजलानां कणिकाः । बिन्दून् वहन् बिभ्रन्नपि मृगपतिः वाहनभूतस्सिंहः । यस्य पादाग्रस्य कान्त्या रक्तप्रभयैव च लोहितः रक्तवर्णस्सन् । वैमानिकैः विमानचारिभिः देवादिभिः युद्धद्रष्टृभिः तथा पूर्वोक्तरक्ताम्भःकणिका वहन् नामानि न ज्ञातः कर्माणि लुङ् । पादाग्रकान्तिरक्ताम्भसोः आरुण्येन सादृश्यात् भेदो न लक्ष्यत इत्यर्थः । अत एव मीलितालङ्कारः । मीलितं यदि सादृश्यात् भेद एव न लक्ष्यत इति लक्षणात् ॥ ३७ ॥

नैवालिम्प निलिम्बमूर्द्धसु नवा सिंहोपरि त्यज्यतां
माचेदं महिषस्य मूर्ध्नि रभसादालिप्य लोलुप्यताम् ।
पत्युर्मौलिनदीजले परमिदं संक्षाळनीयं त्वये-
त्याळीकेळिगिरौ जयन्ति गिरिजे त्वत्पादलाक्षार्पणे ॥

देववन्द्यत्वं युद्धसामर्थ्यं दुष्टनाशकत्वं सौभाग्यं च सूचयन् श्रीपादं स्तौति । नैवेति — गिरिजे इति पदं महावाक्येवान्तरवाक्येषु च योजनीयम् । पूर्वार्द्धगत मिदमितिपदमाद्यवाक्ये द्वितीयान्ततया इतरत्र प्रथमान्ततया च योज्यम् । हे गिरिजे त्वं इद-

मस्माभिः कृतं पादयोः लाक्षानुलेपनं निलिम्पानां पादप्रणतानां देवानां मूर्द्धसु शिरस्सु नैवालिम्प नैवालेपनं कुरु न संक्रामयेत्यर्थः। तथा त्वया इदं कर्म सिंहस्य युद्धसमये वाहनभूतस्य उपरि पृष्ठे वा न त्यज्यतां न क्षिप्यतां न संक्रम्यतामित्यर्थः। कर्मणि लोट्। तथा हे गिरिजे त्वया इदं महिषस्यासुरस्य मूर्ध्नि च रभसात् वेगात्। रभसो वेगहर्षयोरिति विश्वः। आलिप्यालेपनं कृत्वा संक्रामय्येत्यर्थः। मालोलुप्यतां पुनः पुनरतिशयेन वा मा नाश्यतां यङन्तात् कर्मणि लोट्। सन्यङोरिति द्वित्वे अभ्यासस्य गुणः। किं तु त्वया इदं पत्युः स्वापराधक्षमापनाय पादप्रणतस्य भर्तुः मौलौ या नदी गङ्गा तस्याः जले परं केवलं संप्रक्षालनीयं सम्यक् क्षालयितुं योग्यं भवतीति शेषः। स्त्रीणां भर्तृवल्लभरूपसौभाग्यस्यैवोत्तमगुणत्वादिति भावः। इति एवंभूताः हे गिरिजे त्वत्पादयोः लाक्षायाः यावकरसस्यार्पणे आलेपने तत्समय इत्यर्थः। आळीनां प्रियसखीनां केळिगिरः नर्मवचनानि जयन्ति सर्वोत्कर्षेण वर्तन्ते। अत्र सौभाग्यफलस्य सापराधभर्तृनमस्कारस्य प्रार्थ्यत्वेन विवक्षितस्य रूपान्तरेणाभिधानात् पर्यायोक्तमलङ्कारः। पर्यायोक्तं तु गम्यस्य वचो भंग्यन्तराश्रयमिति लक्षणात् ॥ ३८॥

नत्वैव प्रथमं त्वदंघ्रिकमलं तौ पुष्पवन्तावुभौ
त्रैलोक्यं महसाभिभूय चरतो व्योमान्तरभ्रान्तौ ।

नाथे तौ कथमन्यथा परिगळल्लाक्षारसक्षाळितौ
वीक्ष्येते भृशशोणबिम्बमुदयारम्भे प्रियंभावुकौ ॥३९॥

आदित्यचन्द्रवन्द्यत्वं वर्णयन् श्रीपादं स्तौति । नत्वेति—उभौ तौ पुष्पवन्तौ आदित्यचन्द्रौ । एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरावित्यमरः । पुष्प विकसन इत्यस्मात् घणि पुष्पशब्दः तस्मान्मतुप् । अयमकारान्तोपि रविशशिनौ पुष्पवन्ताख्यौ इति नाममाला, पुष्पदन्तौ पुष्पवन्तावेकोक्त्या शशिभास्करौ इति हैमोपि । प्रथमं उदयात्पूर्वं तवांघ्रिकमलं पादपद्मं लाक्षारसरक्तमिति भावः । नत्वैव उदितावित्ति शेषः । महसा तेजसा त्रयाणां लोकानां समाहारः त्रिलोकी । त्रिलोकीव त्रैलोक्यं चतुर्वर्णादीनां उपसंख्यानं इति स्वार्थे ष्यञ् । अभिभूय प्रताप्य व्योमान्तरमाकाशावकाशः । तदेव प्रान्तरं दूरच्छायाजनादिवर्जितमार्गः । तस्मिन् चरतः सञ्चारं कुरुतः । प्रान्तरं दूरशून्येध्वेयमरः । तत्र हेतुमाह । नाथे इति—हे नाथ स्वामिनि अन्यथा त्वत्पादप्रणाममकृत्वैव उदयारम्भे अप्रियौ प्रियौ भवत इति प्रियं भावुकौ कालभेदेनाप्रियावपि प्रायेण लोकोपकारकौ । प्रियशब्दउपपदे । भवतेः कर्तरि भुवः खिष्णुच्खुकञाविति ष्खुकञि अरुर्द्विषदजन्तस्य मुमिति मुमागमः । तौ पुष्पवन्तौ परिगळद्भिः त्वत्पादाभ्यां परिस्रवद्भिः लाक्षारसैः यावकरसैः क्षाळितौ स्नापितौ व्याप्तौ सन्तौ अत एव उदयारम्भे आविर्भावादौ भृशशोणौ अ

त्यन्तरक्तौ बिम्बौ मण्डलौ यस्मिन् कर्मणि तद्यथा भवति तथा । कथं वीक्ष्येते दृश्येते जनैरिति शेषः । कर्मणि लट् । अत्र चन्द्रसूर्यबिम्बयोः लाक्षारसरूपसंक्रान्तिवर्णनात् तद्गुणालङ्कारः । तद्गुणः स्वगुणत्यागात् अन्योत्कृष्टगुणाहृतिः । इति लक्षणात् ॥

त्रैलोक्यं वशयन्ति पापपटलीमुच्चाटयन्युच्चकै-
र्विद्वेषं जनयन्त्यधर्मविषये प्रस्तंभयन्त्यापदम् ।
आकर्षन्त्यभिवाञ्छितानि महिषस्त्रैरिणो मारणा-
श्चित्रं त्वत्पदसिद्धचूर्णनिवहाष्षट्कर्मणां साधकाः ॥

वश्योच्चाटनविद्वेषणस्तम्भनाकर्षणमारणाख्यानि षट्कर्माणि मन्त्रशास्त्रप्रसिद्धानि । देवीपादरेणूनां तत्फलकारकत्वेन तत्साधकत्वं वर्णयन् श्रीपादं स्तौति । त्रैलोक्यमिति— हे देवि त्वत्पादयोः सम्बन्धिनः सिद्धाः चूर्णनिवहाः रेणुसंघाः कर्तारः । त्रयाणां लोकानां समाहारः त्रिलोकी । त्रिलोक्येव त्रैलोक्यं चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्ञ् । त्रिभुवनं वशं स्वाधीनं कुर्वन्ति वशयन्ति भजतामिति शेषः । वशशब्दात् तत्करोतीति ण्यन्तात् कर्तरि लट् । तथा उच्चकैः उन्नतां महतीमिति यावत् । पापानां दुरितानां पटलीं समूहं उच्चाटयन्ति उद्वासयन्ति नाशयन्तीत्यर्थः । दूरतरमुच्चाटयन्तीति वा । तथा अधर्मे निषिद्धकर्मणि विषये उच्चकैः विद्वेषं विरोधं जनयन्ति कुर्वन्ति । तथा आपदं प्रस्तंभयन्ति प्र-

तिबध्नन्ति नाशयन्तीत्यर्थः । अभिवाञ्छितानि अभीष्टानि आकर्षन्ति साधयन्ति । एतत्पर्यन्तं भजतामिति शेषः । तथा महिषस्वर्वैरिणः महिषासुरस्य मारणाः मरणजनका भवन्ति तस्तात् षट्कर्मणां वश्यादीनां साधकाः साधयितारः षट्कर्मसिद्धा भवन्तीत्यर्थः । चित्रम् । अत्र देवीपादचूर्णानां वशयितृत्वोच्चाटयितृत्वाद्यनेकधर्मैरुल्लेखनादुल्लेखालङ्कारः । एकेन बहुधोल्लेखेप्यसौ विषयभेदतः इति लक्षणात् ॥ ४० ॥

किं कल्पद्रुमपञ्चकं प्रणमतामाकांक्षितापादने
किं पञ्चायुधबाणपञ्चकमिदं मारारिसंमोहने ।
सूक्ष्मं किञ्चन पञ्चभूतवपुषो विश्वस्य किं कारणं
त्वपादांगुलिपञ्चकात्मकमिदं किं भाति शम्भोःप्रिये ॥

अङ्गुलिपञ्चकं वर्णयन् श्रीपादं स्तौति । किमिति— हे शम्भोः प्रिये पार्वति इदं त्वत्पादांगुलिपञ्चकरूपं वस्तु प्रणमतां नमस्कुर्वतां जनानां आकांक्षितापादने कामितवस्तुसम्पादने निमित्ते कल्पद्रुमाणां मन्दारादीनां देवतरूणां पञ्चकं भवति किं । पञ्चैते देवतरवो मन्दारः पारिजातकः सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् इत्यमरः । तथा मारारेः शिवस्य सम्मोहने निमित्ते पञ्चायुधस्य कामस्य बाणानां शराणां पञ्चकं भवति किम् ।

अरविन्दमशोकं च चूतं च नवमालती । नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः ॥ तथा पञ्चभूतानि पृथिव्यादीनि वपुः शरीरं रूपमिति यावत् । यस्य तस्य पञ्चभूतवपुषः विश्वस्य जगतः सूक्ष्मं अल्पं किञ्चन किमपि अनिर्वचनीयं कारणं बीजं भवति किम् । वृक्षादिकार्यापेक्षया तत्कारणबीजस्य सूक्ष्मत्वदर्शनादिति भावः । त्वत्पादांगुलिपञ्चकं तव पादयोः यदंगुलीनां पञ्चकं तद्रूपमिदं वस्तु किं उक्तेषु कल्पद्रुमपञ्चकादिषु मध्येकतमद् भाति सन्देहालङ्कारः ॥ ४१ ॥

डोळाकेळिषु दूरदूरगमने प्रेंखोळनाविभ्रमे
मेदिन्यामनिपातितं जयति ते नाथे पदांभोरुहम् ।
भक्त्या सन्नमतां त्वदाननगळद्गानामृतामूर्च्छया
भूपृष्ठे चिरवासिनां दिविषदामाघट्टनासाध्वसात् ॥४२॥

डोळाकेळौ देववन्द्यत्वं वर्णयन् श्रीपादं स्तौति । डोळेति— हे नाथे डोळाकेळिषु डोळायां केळिषु क्रीडासु प्रेंखोळना आन्दोळनं सैव विभ्रमः विलासः । तस्मिन् दूरदूरगमने आन्दोळनवेगात् अत्यन्तदूरगमनक्रमेण दूराद्दूरस्यगमने वा । भक्त्या सन्नमतां नमस्कुर्वतां तव आननात् मुखात् गळत् निर्गच्छत् यद्गानं तदेवामृतं तेन या आमूर्च्छा ईषन्मोहः गानामृतश्रवणजनितमोहालस्येन इत्यर्थः । हेतुना भूपृष्ठे भूतले चिरवासिनां चिर-

शायिनां इत्यपि पाठः । दिविषदां देवानां आघट्टनायाः अभिघातात् साध्वसात् भयात् हेतोः । मेदिन्यां भूमौ अनिपातितं पुरोभागपश्चात्भागयोः दूरगमने पदाम्भोरुहस्य उच्चस्थितावपि तन्मध्ये भूतलसामीप्येन उक्तहेतोः अवधानात् अनाघट्टितं ते तव पादांभोरुहं जयति सर्वोत्कर्षेण वर्तत इति भक्तवात्सल्यातिशयोक्तिः । गाने नैपुण्यातिशयोक्तिश्च ॥ ४२ ॥

मञ्जीरप्रसरन्मसारसुषमारूपा कलिन्दात्मजा
स्वच्छच्छायनखांशुसञ्चयमयी गङ्गा च सङ्गामुका ।
शोणः पादरुचां च यश्च मिलितो येन त्वदग्रे नतो
मज्जन्तीव नमन्ति तत्र मुनयस्सर्वेपि शर्वाङ्गने ॥४३॥

मुनिवन्द्यत्वं वर्णयन् श्रीपादं स्तौति । मञ्जीरेति — हे शर्वाङ्गने पार्वति येन हेतुना तवाग्रे पुरोभागे मञ्जीरयोः नूपुरयोः प्रसरन्ती या मसाराणां इन्द्रनीलमणीनां सुषमा परमशोभा सैव रूपं यस्याः सा तथोक्ता कलिन्दात्मजा कालिन्दी । सङ्गामुका-सङ्गता । लषपतेत्यादिना गमेः कर्तरि उकञ् प्रत्ययः । तथा स्वाच्छच्छायानां निर्मलकान्तीनां नखानां अंशुसञ्चयः रश्मिसमूह एव स्वच्छच्छायनखांशुसञ्चयमयी स्वार्थे मयट् । गङ्गा च सङ्गामुका तथा शोणो रक्तः । पादरुचां त्वच्चरणकान्तीनां च यः समूहः एव शोणो नदविशेषश्च मिलितः सङ्गतः ततो हेतोः सर्वेपि मुनयः

तत्र उक्तगङ्गादिसङ्गमस्थले त्वदग्रे मज्जन्ति मज्जनं कुर्वन्तीव नमन्ति नमस्कुर्वन्ति मज्जनं कुर्वन्त इव नमन्तीत्यर्थः । अत्र देवीपादमञ्जीरास्थितनीलमणिकान्त्यादीनां कालिन्दीत्वादिना रूपणात् रूपकालङ्कारः । मुनिकर्तृके नमने मज्जनतादात्म्यसम्भावनात् उत्प्रेक्षा च तयोरङ्गांगिभावेन सङ्करः ॥ ४३ ॥

मञ्जीरार्पितशक्रनीलशकलश्रीचञ्चळीकाञ्चितं
राजद्रेणुविभूषितं परमहंसाळीभिरासेवितम् ।
त्वत्पादाग्रसरोजमंगुलिदळच्छायाभिराभासुरं
विष्वग्रोचिनखांशुजालपयासि स्वच्छे समुच्छोभते ॥

नखादिशोभां वर्णयन् श्रीपादं स्तौति । मञ्जीरेति— मञ्जीरयोः नूपुरयोः अर्पितानि खचितानि यानि शक्रनीलशकलानि इन्द्रनीलमणिखण्डानि तेषां श्रियः शोभा एव चञ्चळीकाः भृङ्गाः तैरञ्चितम् । मनोहरं राजद्भिः प्रकाशमानैः रेणुभिः रजोभिः विभूषितं अलंकृतम् । परमहंसाः । कुटीचकादिषु चतुर्षु संन्यासिषु मुख्याः शिखायज्ञोपवीतरहिताः सन्यासिनः । तदुक्तं सूतसंहितायां— चतुर्विधास्तु विज्ञेया भिक्षवो वृत्तिभेदतः । कुटीचको मुनिश्रेष्ठः तथैव च बहूदकः । हंसः परमहंसश्चेति— परमहंसवृत्तिकथने शिखां यज्ञोपवीतं च नियकर्म परित्यजेत् इति च । त

एव परमहंसा राजहंसा इति श्लिष्टरूपकम् । तेषां आळिभिः पंक्तिभिः आसेवितं आ समन्तात् उपासितं अंगुलय एव दळानि पद्मावयवपत्राणि तेषां छायाभिः कान्तिभिः आसमन्तात् भासुरं प्रकाशमानं। छाया सूर्यप्रिया कान्तिरित्यमरः। त्वत्पादयोः अग्रमेव सरोजं रक्तपद्मं त्वत्पादाग्रसरोजं कर्तृ । स्वच्छे निर्मले विष्वक् सर्वतः रोचिनः प्रकाशमानाः ये नखानां अंशवः किरणाः तेषां जालं समूह एव पयो जलं तस्मिन् विष्वग्रोचिनखांशुजालपयासि अधिकरणे सप्तमी । समन्ततस्तु परितस्सर्वतो विष्वागित्यपीत्यव्ययेष्वमरः । समुच्छोभते सम्यगुत्कर्षेण प्रकाशते । निर्मले पयसि पद्मामिव त्वत्पादनखकिरणमण्डले त्वत्पादाग्रं शोभते इत्यर्थः। रूपकालङ्कारः ॥ ४४ ॥

मञ्जीरस्वनमंजुविष्किररवे तत्सङ्गिनीलोपल-
च्छायारूपतमोलवे नस्वामिषादक्षीणतारागणे ।
सन्ध्यारागनिभस्वकान्तिपटले त्वत्पादमूलात्मक-
प्रत्यूषोपगमे हि देवि लभते लोकः प्रबोधोदयम् ॥४५॥

ज्ञानप्रदत्वेन श्रीपादं स्तौति । मञ्जीरेति— हे देवि मञ्जीरयोः नूपुरयोः स्वनः शब्द एव मंजुः मधुरः विष्किराणां पक्षिणां रवः शब्दो यस्मिन् तस्मिन् तथोक्ते । उषसि हि पक्षिणश्शब्दं कुर्वन्तीति भावः । तथा तयोः मञ्जीरयोः सङ्गिनौ स-

त्तौ यौ नीलोपलौ इन्द्रनीलरत्ने । उपलो प्रावरणयोरिति हैमः । तयोः छाया नीलकान्तिरेव रूपं स्वरूपं यस्य सः तथोक्तः । तमोलवः अन्धकारलेशो यस्मिन् तस्मिन् तथोक्ते नीलोपलानां छायेति न युक्तः । तथा सति छाया बाहुल्य इति नपुंसकत्वेन ह्रस्वत्वापत्तेः । केचित्तु नीलोपलानां छाया नीलोपलच्छायं तदेवारूपः न्यायनये तेजोभावरूपत्वेन रूपरहितः । तमोलव इति वा व्याख्येयमित्याहुः । उषसि हि तमोलेश एव भवतीति भावः । नखमिषात् नखव्याजात् अक्षीणः ईषत् नष्टः ताराणां नक्षत्राणां गणः समूहो यस्मिन् तस्मिन् । अक्षीणतारागणे नखात्मककतिपयनक्षत्रयुक्ते इत्यर्थः । सन्ध्यायाः प्रातस्सन्ध्यायाः सम्बन्धिना रागेण रक्तिमवर्णेन सदृशः सन्ध्यारागनिभः इयस्वपदविग्रहः । (नि) स्युरुपमार्थपदे त्वमी निभसङ्काशनीकाशप्रतीकाशोपमादयः इत्यमरकोशात् । तादृशः स्वस्य त्वत्पादमूलस्य कान्तीनां प्रभाणां पटलः समूहः यस्मिन तस्मिन् तथोक्ते स्वकान्तिपटलात्मकसन्ध्यारागयुक्ते इत्यर्थः । तव पादयोः मूलं तलमेवात्मा स्वरूपं यस्य सः त्वत्पादमूलात्मकः यः प्रत्यूषः प्रभातकालः । तस्य उपगमे प्राप्तौ सतीति शेषः । लोको जनः प्रबोधस्य प्रकृष्टज्ञानस्य तत्वज्ञानस्येति यावत् । निद्रानाशजन्यबोधस्य च उदयं उत्पत्तिं लभते हि प्राप्नोत्येव । (नि) हिर्हेतावववधारणे इत्यमरः । त्वत्पादभजनात् तत्वज्ञानोत्पत्तिरित्यर्थः । अत्र मञ्जीरस्वनादीनां पक्षिशब्दत्वादिना रूपणाद्रूपकालङ्कारः ॥ ४५ ॥

विद्यामुक्तिरमावधूषु नितरां कामातुरा मानवा-
स्तप्तास्त्वन्नखकान्तिचन्दनरसैरालिप्य गात्रं निजम् ।
त्वत्पादाब्जरुचिप्रवाळनिचिते भूमीतले शेरते
नित्यं देवि भवत्कृपाप्रियसखीविश्वासतः केवलम् ॥

विद्यादिफलदातृत्वेन श्रीपादं स्तौति । विद्येति— हे देवि विद्या वेदवेदाङ्गादिः मुक्तिः मोक्षः रमा श्रीः सम्पदिति यावत् । तास्वेव वधूषु नारीषु नितरां काम इच्छा स एव कामः स्मरः तेनातुराः रागिणः अत्यन्तकामिन इत्यर्थः । इच्छामनोभवौ कामावित्यमरः । मानवा मनुष्याः । तप्ताः विद्याद्यलाभात् दुःखिताः कामसन्तप्ताश्च सन्तः । निजं आत्मीयं गात्रं शरीरं तव नखकान्तय एव चन्दनरसाः चन्दनद्रवाः तैः आलिप्य आलेपनं कृत्वा त्वत्पादाब्जरुचयः त्वत्पादारविन्दरक्तकान्तय एव प्रवाळाः पल्लवाः तैः निचिते आस्तृते भूमीतले त्वत्पादसमीपभूतले अधिकरणे । भवत्याः कृपा दया एव प्रियसखी इष्टवयस्या तस्यां विश्वासतः केवलं इयमेव मम तापनिराकरणपूर्वकं कामं पूरयिष्यतीति विस्रम्भादेव नित्यं सदा शेरते शयनं कुर्वन्ति । कामिनां चन्दनरसालेपनपल्लवशय्याशयनादयः शीतोपचाराः प्रसिद्धाः । अत्र साष्टाङ्गनमस्कारस्य भूतलशयनत्वेन नखकान्तिव्यापनस्य चन्दनरसालेपनत्वेन च निगरणान रूपकानिशयोक्तिश्चेत्यनयोः सङ्करः । रूपकालङ्कारः ॥ ४६ ॥

मञ्जीरक्वणितैः क्षिपन्निव मुहुः श्रीमन्नखांशूद्गमैः
दैत्येन्द्रं प्रहसन्निवारुणरुचा रुष्यन्निवास्मै भृशम् ।
धीरायां त्वयि निर्विकारमनसि त्वत्पाद एव स्फुटं
पुष्णन् वैरिविकारमेष महिषध्वंसी परित्रायताम् ॥४७॥

दुष्टविरोधित्वेन श्रीपादं स्तौति । मञ्जीरेति— हे देवि धीरायां विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीरा इत्युक्तलक्षणधैर्यशालिन्यां त्वयि दुष्टं महिषासुरं दृष्ट्वा निर्गतो विकारः । परुषवचनादिजनककोपरूपो वैरविकारः । यस्मात् तन्मनो यस्याः तस्यां निर्विकारमनसि स्थितायां सत्यां मञ्जीरक्वणितैः नूपुरशब्दैः करणैः । दैत्येन्द्रं महिषासुरं मुहुः क्षिपन् रे रे महिष दुष्टं त्वा महमेव हन्मीत्यादि परुषवचनैराक्षिपन्निव स्थितः । तथा श्रीमतां शोभावतां नखानां सम्बन्धिनो ये अंशवः धवळप्रभाः तेषां उद्गमैः उल्लासैः प्रहसन्निव । तथा अरुणरुचा स्वरक्तकान्त्या अस्मै दैत्येन्द्राय भृशं अत्यन्तं रुष्यन् कुप्यन्निव स्थितः एवमेव स्वयमेव स्फुटं स्पष्टम् यथा तथा वैरिविकारं शत्रूणां सम्भाव्यमानं विकारं पुष्णन् प्रकटयन् महिषध्वंसी एष त्वत्पादः । परित्रायतां रक्षतु । मां भक्तान् वा इति शेषः । अत्र मञ्जीरक्वणिते आक्षेपवचनत्वं धवळनखकान्तौ हासत्वं स्वाभाविकपादरागे रोषहेतुकत्वं च उत्प्रेक्ष्यते । तासां च संसृष्टिः ॥ ४७ ॥

क्षिप्रं देवि शिरस्पदेन महिषं पिष्ट्वा ततोधःपदं
दित्सन्त्यां त्वयि कण्ठभञ्जनभिया कण्ठीरवे विद्रुते ।
मेदिन्यामपि भीतिकम्पिततनौ प्रेमत्वराशालिना
शर्वेणैव निजाङ्कसीम्नि निहितं पादद्वयं ते जयेत् ॥४८॥

दुष्टनिग्रहसामर्थ्यं सौभाग्यगुणं च वर्णयन् श्रीपादं स्तौति । क्षिप्रमिति — हे देवि त्वयि भवत्यां शिरस्पदेन पादाग्रेण करणेन पदस्य शिरः अग्रं शिरस्पदं अथवा शिरश्च तत्पदं च शिरस्पदमिति समानाधिकरणसमासः । तदुक्तं वामनेन— हस्ताग्राग्रहस्तयोर्गुणगुणिनोरभेदादिति । अधः शिरासि पदे इति विसर्गस्य सत्वं महिषं महिषासुरं पिष्ट्वा मर्दयित्वा ततः अनन्तरं पदं तं स्वपदं अधः अधोभागे यत्र कुत्रापि दित्सन्त्यां दातुमिच्छन्त्यां निधातुमिच्छन्त्यां इति यावत् । त्वयां । अधःपदमिति सविसर्गः पाठः । अधश्शिरसि पदे इति सूत्रे समासे शत्यनुवर्तनात् । कण्ठीरवे स्ववाहनभूते सिंहे कण्ठस्य गळस्य भञ्जनात् भङ्गात् देवीपादन्यासकृतात् भिया भयेन हेतुना विद्रुते पलायितवति सति कर्तरि क्तः । मेदिन्यां भूम्यामपि भीत्या देवीपादन्यासकृतभञ्जनात् भयेन कम्पिततनौ चलितगात्र्यां सत्यां प्रेम्णा अनुरागेण या त्वरा संभ्रमः तेन शालते शोभते इति प्रेमत्वराशाली तेन शर्वेण शिवेनैव स्वयमेव निजाङ्कसीम्नि निजोत्सङ्गदेशे निहितं समर्पितं

ते तव पादद्वयं चरणयुगळं जयेत् सर्वोत्कर्षेण वर्ततां प्रार्थनायां लिङ् ॥ ४८ ॥

पूर्वं देवि पदांबुजेन महिषप्रध्वंसनाभ्यासतः
पश्चात् कुत्सितसुम्भदैत्यविजयोप्येवं कृतः किं त्वया ।
नो चेद् भाति कथं कुसुम्भविजयी पादाब्जदेशोयमि-
त्यालापे गिरिशस्य तद्विजयते मन्दस्मितं देवि ते ॥४९॥

दुष्टनिग्रहसामर्थ्यं सौभाग्यं वर्णयन् श्रीपादं स्तौति । पूर्वमिति— हे देवि इति गिरिशस्य पार्वतीं प्रति संबोधनं त्वया कर्त्र्या पूर्वं पूर्वकाले पदांबुजेन करणेन महिषस्य माहिषासुरस्य यत् प्रध्वंसनं मारणं तस्याभ्यासतः अभ्यासात् शीलादित्यर्थः । पश्चात् अनन्तरं कुत्सितस्याधमस्य सुम्भदैत्यस्य विजयः । अपि एवं पादांबुजेनैव कृतो विहितः । किं कुत्सितसुम्भविजये पादांबुजकृतत्वं महिषध्वंसनशैलीकृतत्वं च उत्प्रेक्ष्यते । अत एव त्वत्पादांबुजे कुसुम्भविजयित्वव्यवहारः । इति श्लेषभंग्या आह । नो चेत् एवं न चेत् अयं पादाब्जदेशः । कुसुम्भविजयी कुसुम्भं महारजनं रक्तमापणौषधिविशेषं विजयत इति कुसुम्भविजयी कुत्सितसुम्भासुरविजयी च कथं भाति । अथ कमलोत्तरं स्यात् कुसुम्भं वह्निशिखं महारजनमित्यपीति वैश्यवर्गेऽमरः । इति एवंभूते गिरिशस्य शिवस्य आलापे नर्मसम्भाषणे सतीति शेषः ।

हे देवीति कविसम्बोधनं ते तव सम्बन्धि तत् अनिर्वचनीयशोभं मन्दस्मितं विजयते सर्वोत्कर्षेण वर्तते । अत्र देवीपादे कुसुम्भ विजायित्वव्यवहारस्य श्लेषेणान्यार्थकत्वकल्पनात् वक्रोक्त्यलङ्कारः। वक्रोक्तिः श्लेषकाकुभ्यां अपरार्थप्रकल्पनम् । इति लक्षणात् ॥४९॥

बिभ्राणेन मनोज्ञयावकरसं मंजुध्वनिं नूपुर-
श्लेषालंकृतिशालिना नखमणीजातप्रसादश्रिया ।
एकेनैव पदेन देवि महिषध्वंसे महीयस्तरः
श्लोकोयं रचितस्त्वयेति विबुधाः संश्लाघनं कुर्वते ॥५०॥

लोके तावत् अनेकैरेव पदैरल्पाक्षरवृत्तमपि श्लोकं कवयन्ति कवयः । त्वन्तु महिषध्वंस एकेनैव पदेनातिमहान्तं श्लोकं कृतवतीति श्लेषभंग्या देवास्त्वामश्लाघन्तेति निवेदयन् श्रीपादं स्तौति । विभ्राणेनेति— हे देवि महिषस्य ध्वंसे एकेन पदेन पिष्ट्वा नाशे कृते सति मनोज्ञो यो यावकस्य लाक्षायाः रसो जलं तं मंजुध्वनिं नूपुरसम्बन्धि मधुरशब्दं अन्यत्र शृङ्गारादिरसात्मकं मंजुं सहृदयहृदयास्वाद्यं ध्वनिं व्यंग्यविशेषं च बिभ्राणेन नूपुरयोः श्लेषः सम्बन्धः तेन अलंकृतिशालिना आभरणवता अन्यत्र श्लेषालङ्कारवता । नखा एव मण्यो रत्नानि ताभिः जाता उत्पन्ना प्रसादस्य औज्वल्यापादनरूपानुग्रहस्य अन्यत्र प्रसादाख्यैकाव्यगुणस्य श्रीः शोभा यस्य तेन नखमणीजातप्रसादश्रिया

रत्नं मणिर्द्वयोः इत्यमरः । कृदिकारादक्तिनः इति वा ङीष् । तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्येति वैकल्पिकपुंवद्भावात् नुमभावः । एवंभूतेन एकेन पदेन चरणेन सुबन्ततिङन्तान्यतरेण च करणेन त्वया कर्त्र्या अयं महीयस्तरः अतिमहीयात् ब्रह्माण्डव्यापी । अन्यत्र महावृत्तः श्लोको यशः पद्यं च । पद्ये यशसि च श्लोक इत्यमरः । रचितः निर्मितः इत्येवं विबुधाः देवाः विद्वांसश्च सम्यक् श्लाघनं प्रशंसां कुर्वते कुर्वन्तिः । श्लेषालङ्कारः ॥ ५० ॥

त्वं शम्भोर्महिषी भवस्यगसुते तेनोपहासायते
दैत्योयं महिषीभवन्नुपगतः सोयं कथं क्षम्यते ।
इत्थं नूपुरनिस्वनैरिव वदन् पादस्त्वदीयो रुषा
शस्त्रप्रग्रहणात् पुरैव महिषं पिष्णन् परित्रायताम् ॥५१॥

शस्त्रग्रहणं विना पादेनैव महिषवधे हेतुमुत्प्रेक्षमाणः श्रीपादं स्तौति । त्वमिति— हे अगसुते पार्वति त्वं शम्भोः शिवस्य महिषी कृताभिषेका भार्या भवसि कासरी च तेन हेतुना अयं दैत्यः महिषासुरः । ते तव उपहासाय महिषीभवन् अमहिषः महिषस्सम्पद्यमानः भवन् महिषरूपधारी महिषी महिषस्त्रीपर्वंश्च लोके तद्रूपधारणं प्रसिद्धमिति भावः । उपगतः युद्धाय तव समीपं प्राप्तवान् तस्मात् सोयं महिषासुरः कथं क्षम्यते

सह्यते मयेति शेषः शीघ्रं हन्तव्य एवेत्यर्थः । इत्थं अनेन प्रकारेण रुषा कोपेन नूपुरानिस्वनैः मञ्जीरशब्दैः वदन्निव स्थितः अत एव शस्त्रप्रग्रहणात् त्वत्कर्तृकात् आयुधग्रहणात् पुरैव पूर्वमेव महिषं महिषासुरं पिष्णन् स्वयं पेषणं कुर्वन् । हे देवि त्वदीयः पादः परित्रायतां परितो रक्षतु । अत्र नूपुरशब्दे उक्तपादवाग्जालत्वसम्भावनारूपा एका वाच्या, पादकर्तृकपेषणे अहेतौ महिषीभवनपूर्वक उपगमे तद्धेतुत्वसम्भावनारूपाश्लेषमूलकाभेदाध्यवसायरूपातिशयोक्त्यनुप्राणिता व्यंग्या चापरा उत्प्रेक्षेत्यनयोस्सङ्करः ॥

देव्या पङ्कशयोद्य कोपि महिषच्छद्मा महान् कण्टकः
पादेनाहत इत्युदूढहसितं सख्या समावेदिते ।
सद्यः कण्टकशालिना करतलेनासाद्य पादांबुजं
गृह्णन्नार्त्तिविनोदनाय गिरिशो जीयात्प्रियस्ते शिवे ॥

दुष्टनिग्रहं सौभाग्यं वर्णयन् श्रीपादं स्तौति । देव्येति— देव्या कर्त्र्या पङ्के शेत इति पङ्कशयः । कर्दमशायी कर्दमस्थितश्च महिष इति छद्म व्याजो यस्य सः महिषच्छद्मा महान् कोपि कण्टकः क्षुद्रशत्रुः शूकापरपर्यायं सूक्ष्मतीक्ष्णाग्रं द्रुमाङ्गं च कर्म । कण्टको न स्त्रियां क्षुद्रशत्रौ मत्स्यादिकीकसे । नैयोगिकादिदोषोक्ते स्याद्रोमाञ्चद्रुमाङ्गयोः इति मेदिनी ॥ अद्यास्मिन् दिने पादेन कर-

णेनाहत: आविद्ध: इत्येवं सख्या उदूढं हसितं यस्मिन् कर्मणि तत् यथा तथा समावेदिते गिरिशं प्रति विज्ञापिते सति हे शिवे ते तव प्रिय: गिरिश: शिव: सद्य: तत्क्षणमेव आसाद्य त्वत्पाद-समीपं प्राप्य आर्ते: निष्ठुरशत्रुताडनजनिताया: शूकाग्रप्रवेशजनितायाश्च पीडाया: विनोदाय निवारणाय कण्टकशालिना रोमाञ्चवता शूकान्तरवता च करतलेन करणेन पादांबुजं गृह्णन् मृदु मर्दनाय शूकाग्रोद्धाराय च गृहीत्वा अङ्के निक्षिपन् सन् जीयात् सर्वोत्कर्षेण वर्ततां आशिषि लिङ् । अत्र प्रकृतार्थपरै: पदै: श्लेषेण पादे कण्टकप्रवेशकण्टक कृततदुद्धारप्रयत्नादिरूपवृत्तान्तप्रतीते: ध्वनिविशेष: ॥ ५२ ॥

त्वत्पादांगुलिपल्लवैरगसुते देवि स्वयं पञ्चभिः
पञ्चत्वं गमितो महासुर इति स्वात्मानुरूपं कृतम् ।
एतैरेव नतो जनस्त्रिदशतां नीतो महेशः पुन-
र्लक्षत्वं गमितः प्रसूनधनुषो विस्मापनं तद्द्वयम् ॥ ५३

दुष्टनिग्रहं भक्तकामितप्रदत्वं भर्तृमोहनत्वं च वर्णयन् श्रीपादं स्तौति । त्वदिति— हे अगसुते पार्वति देवि पञ्चभि: पञ्चसंख्याकै: पल्लवा इव तव पादांगुलय: त्वत्पादांगुलिपल्लवा: तै: कर्तृभि: स्वयं आत्मनैव महासुर: महिषासुर: पञ्चत्वं मरणं पञ्चसंख्याकत्वञ्च । (नि) स्यात् पञ्चता कालधर्म इति मरणपर्या-

येऽमरः। गमितः इत्येतत् स्वस्य आत्मनः पञ्चसंख्याकत्वस्य माघस्य अनुरूपं सदृशं यथा तथा कृतं पञ्चसंख्याकैः स्वसम्बन्धेन पञ्चसंख्याकत्वकरणं युक्तमित्यर्थः । तदतिरिक्तसंख्याकत्वकरणन्तु चित्रमित्याह । एतैरिति— एतैः पञ्चभिः त्वत्पादांगुलिपल्लवैः एव कर्तृभिः नतो जनः प्रणामकर्तृलोकः त्रिदशतां देवत्वं त्रयो दश त्रिदश तत्तां त्रिंशत्वञ्च नीतः प्रापितः तथा महेशः पुनः महादेवस्तु प्रसूनधनुषः कामस्य लक्ष्यत्वं स्वशरप्रयोगलक्ष्यत्वं लक्षसंख्याकत्वञ्च गमितः । तद्द्वयं पञ्चभिः त्रिदशत्वकरणं लक्ष्यत्वकरणञ्चेत्येतत् द्वितयं कर्तृ विस्मापयतीति विस्मापनं आश्चर्यजनकम् । अत्र पूर्वार्द्धे समालङ्कारः । सारूप्यमपि कार्यस्य कारणेन समं विदुः इति लक्षणात् । उत्तरार्द्धे विरोधाभासद्वयम् । एवं अलङ्कारत्रयञ्च श्लेषसङ्कीर्णं परस्परसंसृष्टञ्च ॥ ५३ ॥

ब्राह्मं माघवनञ्च वाहनमहो मन्दैर्गतैर्निन्दितं
धावल्येन नखत्विषा विहसितो वाहोपि माहेश्वरः ।
इत्थं वाहनवैरितां भजति ते पादस्ततो मन्महे
कात्यायन्यमुना न्यघानि महिषः कार्त्तान्तवाहभ्रमात् ॥

गतिगुणं नखशोभां दुष्टनिग्रहसामर्थ्यं च वर्णयन् श्रीपादं स्तौति । ब्राह्मेति— ब्रह्मण इदं ब्राह्मं ब्राह्मो जातावितिनिपातनादणि टिलोपः । विरिञ्चसम्बन्धि मघोन इदं माघवनं अन्नि-

ति प्रकृतिभावात् टिलोपो न । इन्द्रसम्बन्धि च वाहनं हंसः ऐरावतश्च मन्दैः गतैः त्वत्पादसम्बन्धिभिः मन्थरयातैरेव कर्तृभिः भावे क्तः निन्दितं गर्हितम् । तथा महेश्वरस्यायं माहेश्वरः वाहोपि वृषभश्च नखात्विषा त्वत्पादसंम्बन्धिनखप्रभया कर्त्र्या धावळ्येन निजशौक्ल्येन करणेन विहसितः परिहसितः निन्दित इत्यर्थः । अहो इत्याश्चर्ये । इत्थं अनेन प्रकारेण हे कात्यायनि ते तव पादः वाहनवैरितां देववाहनमात्रशत्रुतां भजति प्राप्नोति । ततः वाहनवैरित्वाद्धेतोः महिषः महिषरूपधारी असुरः कृतान्तस्यायं कार्तान्तः अन्तकसंम्बन्धी । वाहः वाहनं महिषः तस्य भ्रमात् अमुना त्वत्पादेन कर्त्रा न्यघानि निहतः कर्मणि लुङ् । सू— स्यसिच्सीयुट् तासिषु भावकर्मणोरियादिना चिण्वद्भावे वृद्धिः । कुत्वं च । इति वयं मन्महे मन्यामहे । अत्र नखप्रभाधावळ्ये हासत्वोत्प्रेक्षा, तथा पादेन महिषहनने अन्तकवाहनमहिषभ्रमस्य असिद्धस्य अहेतोः हेतुत्वोत्प्रेक्षा चेति उत्प्रेक्षाद्वयम् । आद्यं व्यंग्यं अन्त्यं वाच्यं तयोः सङ्करः ॥ ५४ ॥

सीमन्तप्रकरे सुरेन्द्रसुदृशां सिन्दूररेखात्मना
माणिक्यद्युतिसंज्ञयैव मकुटीकोटीषु दैत्यद्रुहाम् ।
शम्भोर्मूर्ध्नि जटाघटारुणरुचिव्याजेन पादप्रभै-
वैका ते परिणाममेति करुणामूर्त्ते गिरीन्द्रात्मजे ॥५५॥

देववन्द्यत्वं सौभाग्यं च वर्णयन् श्रीपादं स्तौति । सीमन्तेति—करुणा मुर्तिः यस्याः तस्याः संबुद्धेः हे करुणामूर्ते गिरीन्द्रात्मजे श्रीपार्वेति ते तव एका पादयोः प्रभा अरुणकान्तिरेव सुरेन्द्रसुद्दां देवेन्द्रसुन्दरीणां उर्वश्यादिदेवाङ्गनानां सीमन्तानां केशविन्यासानां प्रकरे समूहे अधिकरणे सप्तमी । सिन्दूरस्य रेखा राजिः तस्याः आत्मना स्वरूपेण प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया । एवमुत्तरत्रापि परिणामं रूपान्तरं एति प्राप्नोति । तथा दैत्यद्रुहां देवानां मकुटीकोटीषु किरीटाग्रेषु माणिक्यद्युतिसंज्ञया पद्मरागमणिप्रभेति नाम्नैव तद्रूपेणेत्यर्थः । परिणममेति । उभयत्र पादप्रणामसमये सीमन्तेषु किरीटाग्रेषु च पादप्रभासंक्रमसम्भवादिति भावः । तथा शम्भोः शिवस्य मूर्ध्नि शिरसि जटाघटायाः जटासमूहस्य या अरुणरुचिः रक्तकान्तिः तस्या व्याजेन परिणाममेति । स्वापराधकृतेर्ष्याकोपापनयनार्थं पादप्रणामसमये जटासु पादप्रभासंक्रमसंभवादिति भावः । अत्र सीमन्तगतसिन्दूररेखादौ तत्त्वमपह्नुत्य पादप्रभात्वारोपात् अपह्नवभेदत्रयं तथा एकस्या देवीपादप्रभायाः सीमन्तादिषु अनेकेषु आधारेषु स्थितिवर्णनात् विशेषालङ्कारः । विशेषस्योपि यद्येकं वस्त्वनेकत्र वर्ण्यत इति लक्षणात् ॥ ५५ ॥

नो केशः परमाश्रयस्सुमनसां पादाब्जरेणुश्च ते
नो मन्दारसिता परं स्मितरुचिर्मञ्जीरयोश्च द्वयी ।

नो बाहुः कळहंसमेत्य जयति त्वद्यानलीलाप्यसौ
नो शुम्भत्तरळाक्षमाननमिदं पादांबुजञ्चाम्बिके ॥५६॥

देववन्द्यत्वं सौन्दर्यादिगुणं च वर्णयन् श्रीपादं स्तौति । नो इति— हे अम्बिके ते केशः कचः परं केवलं सुमनसां पुष्पाणां आश्रयः आधारः नो भवति । किं तु पादाब्जरेणुश्च सुमनसां देवानां आश्रयः भवति । एवं ते स्मितरुचिः मन्दहासकान्तिः परं केवलं मन्दार इव मन्दारपुष्पमिव सिता धवळा नो भवति । किं तु मञ्जीरयोः नूपुरयोः द्वयी च मन्दारासिता मन्दं अल्पं अतीक्ष्णं मधुरमिति यावत् इति वा । मन्देऽतीक्ष्णे च मूर्खे च स्वैरे चाभाग्यरोगिणोः अल्पे च त्रिषु पुंसि स्याद्धस्तिजात्यन्तरे शनौ इति विश्वः । आरासित आरावः यस्याः सा मन्दारासिता भवति । रस शब्द इयस्मात् भावे कः । तथा ते बाहुः भुजः परं कलहं असुरादिभिस्सह युद्धं कळयोरभेदः । समेत्य संप्राप्य नो जयति जयं प्राप्नोति । अपि तु असौ तव यानलीला गतिविलासोपि कळहंसं मराळपक्षिणं एव जयति । इत्थं ते इदं आननं मुखं परं शुम्भत्तरळाक्षं शुम्भन्ती शोभमाने तरळे चञ्चले च अक्षिणी यस्मिन् तत् अथवा सुम्भन्ति तरळानि अक्षीणि यस्मिंस्तत् तथोक्तं नो भवति । अपि तु ते पादांबुजं च शुम्भत्तरा अतिशोभमाना लाक्षा अलक्तकरसः यस्मिंस्तत् शुम्भत्तरळाक्षं भवति । अत्र प्रकृतयोः केशपादाब्जरेण्वोः स्मितरुचि

मञ्जीरद्वयोः बाहुयानलीलयोः मुखपादांबुजयोश्च शब्दमात्रसाधर्म्यवर्णनात् प्रकृतश्लेषः । केशास्मितरुचिबाहुमुखस्य अप्रकृतत्वविवक्षायान्तूभयश्लेषः ॥ ५६ ॥

नाथे तावकवाहसिंहचकितास्त्वत्पादमूले नता
नूनं बभ्रमुरभ्रमुप्रियमुखा दिक्कुम्भिवीराश्चिरम् ।
नो चेदेष कथं तदुन्नताशिरस्सिन्दूरसन्दोहजो
रागस्ते चरणांबुजे परिणमन्नद्यापि विद्योतते ॥ ५७ ॥

दिग्गजवन्द्यत्वं रागगुणं वर्णयन् श्रीपादं स्तौति । नाथे इति — हे नाथे स्वामिनि अभ्रमुप्रियः ऐरावतः मुखं आदिः येषां ते तथोक्ताः दिक्कुम्भिवीराः दिग्गजश्रेष्ठाः । तावकः त्वत्सम्बन्धी यो वाहः वाहनं स चासौ सिंहश्च तावकवाहसिंहः । तस्मात् स्वभावशत्रोः चकिताः भीताः । अत एव त्वत्पादयोः मूले नताः भयनिवृत्त्यर्थं नमनं कृतवन्तः सन्तः चिरं बभ्रमुः लुठितवन्तः नूनं निश्चयः । अत्र हेतुमाह । नो चेदिति नो चेत् एवं न यदि एषः दृश्यमानः तेषां ऐरावतादिदिग्गजानां उन्नतेषु शिरस्सु ये सिन्दूरसन्दोहाः अलङ्कारार्थं अनुलिप्ता नागसम्भवसमूहाः तेभ्यो जायत इति तज्जः तत्सम्बन्धीत्यर्थः । सिन्दूरं नागसम्भवमित्यमरः । रागः रक्तिमा ते तव पादांबुजे कथं परिणमन् त्वत्पादरागरूपतां प्राप्नुवत् अद्यापि विद्योतते प्रकाशते

त्वत्पादयोः दिग्गजशिरःसिन्दूररागदर्शनात् निश्चीयते दिग्गजैः त्वद्बाहनसिंहभयात् त्वत्पादयोः पतित्वा चिरकालं लुठितमितीत्यर्थः । अत्र स्वाभाविके देवीपादरागे दिग्गजशिरःसिन्दूरसंक्रान्तिहेतुकत्वमुत्प्रेक्ष्यते ॥ ५७ ॥

त्वत्पादोयमजाश्रितश्च रुचिरस्पर्शान्वितो योगिना-
मन्तस्थाकृतिरूष्मभाक् च महिषप्रध्वंसनप्रक्रमे ।
एवं खल्वखिलाक्षरात्मकममुं शैलेन्द्रकन्ये कथं
भाषन्ते नतवर्गबन्धुमपवर्गालम्बनं वा जनाः ॥ ५८ ॥

ब्रह्मवन्द्यत्वं मार्दवगुणं योगिध्येयत्वं दुष्टनिग्रहसामर्थ्यं नित्यत्वं भक्तपक्षपातित्वं मोक्षदातृत्वं च वर्णयन् श्रीपादं स्तौति । त्वत्पाद इति — हे शैलेन्द्रकन्ये अयं त्वत्पादः अजेन ब्रह्मणा आश्रितः सेवितः अजिभः अच्प्रत्याहारान्तर्गतैः अकाराद्यौकारान्तैः वर्णैः आश्रितो युक्तश्च । तथा रुचिरेण मनोहरेण स्पर्शेन स्पर्शगुणेन अन्वितः रुचिरः सुन्दरः कवर्गादिपवर्गान्तैः वर्णैश्च अन्वितो युक्तश्च । योगिनां यमनियमाद्यष्टाङ्गयोगवतां मुनीनां अन्तः अन्तःकरणे तिष्ठतीति अन्तस्था आकृतिः यस्य सः तथोक्तः । य र ल व वर्णस्वरूपश्च महिषस्य माहिषासुरस्य प्रध्वंसनस्य हिंसायाः प्रक्रमे आरम्भे ऊष्माणं उष्णं तद्वत् दुस्सहं प्रतापं वा ऊष्मणः श ष स ह वर्णांश्च भजतीति ऊष्मभाक्च

भवति । ऊष्माणस्तु निदाघोष्णग्रीष्माश्च ष स ह्या अपीति व्याख्यासुधाख्यायामपरव्याख्यायाम् । तथा चोक्तं शास्त्रकारैः कादयो मावसानाः स्पर्शाः । य र ल वा अन्तस्थाः । स ष स ह्या ऊष्माणः । अ चः स्वरा इति । एवं उक्तप्रकारेण अखिलाक्षरात्मकं अखिलानि अक्षराणि अकारादिवर्णा आत्मनि यस्य तं अखिलैस्सर्वैरपि नाशहेतुभिः अक्षरः अनश्वरः आत्मा स्वरूपं यस्य तं च। खल्वित्यवधारणे । अमुम् त्वत्पादं जनाः त वर्गस्य स्पर्शान्तर्गतस्य तकारादि नकारान्तवर्णात्मकस्य बन्धुः सहायः त वर्गसहित इत्यर्थः । स न भवतीति नतवर्गबन्धुः तवर्गरहित इत्यर्थः। तं इति विरोधः । नतवर्गस्य प्रणतजनसमूहस्य बन्धुं सुहृदमित्यविरोधः । तथा पवर्गस्य पकारादिमकारान्तवर्णात्मकस्य आलम्बनं आश्रयः तन्न भवतीति अपवर्गालम्बनं तदिति विरोधः । अपवर्गस्य मोक्षस्य आलम्बनं तद्दातारमित्यविरोधः । कथं वा भाषन्ते वदन्तीति न जान इति शेषः ।अत एव विरोधाभासोऽलङ्कारः । स चाजाश्रित इत्यादिश्लेषमूलकाभेदाध्यवसायरूपातिशयोक्तिमुपजीवतीति तेषां सङ्करः ॥ ५८ ॥

उन्मीलन्नखमण्डलीहिमकणः शोणप्रभागैरिकं
बिभ्राणः परिशोभमानकटको भूयो वनैकाश्रयः ।
गायत्सिद्धवधूनिषेवितलः पादस्त्वदीयश्शिवे
राजत्येष हिमाद्रिपादवदिदं युक्तं हिमाद्रेस्सुते ॥ ५९ ॥

नखकान्त्यादिकृतां अलङ्कारकृतां च शोभां तथा सर्वरक्षकत्वं सिद्धाङ्गनासेव्यत्वं च वर्णयन् श्रीपादं स्तौति । उन्मीलदिति—हे हिमाद्रेस्सुते पार्वति उन्मीलतां उद्गच्छतां नखानां या मण्डली समूहः सैव हिमकणाः तुहिनबिन्दवो यस्मिन् सः तथोक्तः । शोणप्रभा स्वाभाविकरक्तद्युतिः एव गैरिकं धातुविशेषं बिभ्राणः दधानः । परिशोभमानकटकः परिशोभमानः कटको लक्षणया नूपुरः अद्रिनितम्बश्च यस्मिन् सः तथोक्तः । कटकोस्त्री नितम्बोद्रेः दन्तिनां दन्तखण्डने । सामुद्रलवणे राजधानीवलययोरपि इति मेदिनी । भूयसां बहूनां जनानां अवने रक्षणे विषये एकाश्रयः मुख्यालम्बः । अन्यत्र भूयसां वनानां काननानां एकाश्रयः अनेकवनाधार इत्यर्थः । गायन्तीभिः सिद्धवधूभिः निषेवितं तलं अधोभागः पृष्ठदेशश्च यस्य स तथोक्तः । त्वदीयः एष पादः चरणः हिमाद्रेः स्वपितुः हिमवतः सम्बन्धीपादः प्रत्यन्तपर्वतः तत्समीपस्थिततत्सम्बन्ध्यल्पपर्वतः चरण इति च गम्यते । तेन तुल्यं हिमाद्रिपादवत् हिमाद्रिपादसदृशः राजति शोभते इदं हिमवत्सुतायाः तव पादस्य हिमवत्पादसादृश्यं युक्तं उचितं भवति । पुत्रीपादादेः पितृपादादिसादृश्यस्य लोके दर्शनादिति भावः । अत्र देवीपादस्य तत्पितृहिमवत्पादसादृश्यवर्णनात् समालङ्कारः । स च रूपकश्लेषसङ्कीर्णः ॥ ५९ ॥

दिक्पालैर्दशभिः पृथक्पृथगयं त्वत्पादयोरर्पितो
ह्रस्यो भक्त्यनुराग एव दशधा शोणांगुलिश्रीमिषात् ।

पादाभ्यामपि तान् प्रति प्रकटिता नूनं प्रसादांकुरा
दृश्यन्ते नखकान्तिपंक्तिदशकव्याजेन शैलात्मजे ॥

दिक्पालभक्तिविषयत्वं तान् प्रति प्रसादाश्रयत्वं च वर्णयन् श्रीपादं स्तौति । दिक्पालैरिति — हे शैलात्मजे श्रीपार्वति दशभिः दशसंख्याकैः दिक्पालैः इन्द्रादिभिः दिक्पतिभिः ब्रह्मण ऊर्ध्वदिक्पतित्वं पाताळाधिष्ठितस्य शेषस्य अधोदिक्पालत्वं चाभिप्रेत्य दशभिरित्युक्तम् । अत एव प्रत्येकं दिक्पालप्रार्थनावसरे अन्ते ब्रह्मशेषयोरपि प्रार्थना वर्णयिष्यते । त्वदादयोः पृथक्पृथक् इत्येकं पदं, अर्पितः उपहृतः अयं भक्तिरेवानुरागः प्रेमापरपर्यायः राग एव शोणानां रक्तानां अंगुलीनां श्रियः कान्तयः तासां मिषात् व्याजात् दशधा दशप्रकारेण दृश्यो लक्ष्यो भवति तथा पादाभ्यां त्वच्चरणाभ्यां कर्तृभ्यामपि तान् दिक्पालान् प्रति प्रकटिताः प्रकाशिताः प्रसादानां अंकुराः नूनं अभिनवोद्गमा एव नखकान्तीनां पंक्तेः जालस्य यत् दशकं तद्व्याजेन दृश्यन्ते । अत्र देवीपादांगुलिकान्तिषु मिषशब्देन तत्त्वमपह्नुत्य दिक्पालभक्त्यनुरागत्वस्य तथा नखकान्तिषु व्याजपदेन तत्त्वं अपह्नुत्य देवीप्रसादांकुरत्वस्य च आरोपात् अपह्नवभेदः ॥ ६० ॥

मेघानां कुलिशस्य चाप्रतिहता धाराः क्रमन्ताञ्चिरं
नो नश्येन्मददानवारिविभवो नाकस्य नागस्य च ।

पुत्रोयं मम सैनिकाश्च दधतान्नित्यं जयन्तस्सुखं
त्वत्पादांबुजपातिनः सुरपतेरित्थं जयन्त्यर्थनाः॥ ६१॥

अथ पूर्वोक्तां दिक्पालसम्बन्धिनीं त्वत्पादभक्तिमुपपादयितुं तेषां प्रार्थनाविशेषान् वर्णयितुकामः प्रथमं देवेन्द्रस्य प्रार्थनां वर्णयन् श्रीपादं स्तौति । मेघानामिति— मेघानां कुलिशस्य वज्रायुधस्य च धारा अविच्छिन्नबिन्दुरूपजलसम्पाताः शिताग्रताश्च अप्रतिहताः अप्रतिबद्धाः सत्यः चिरं चिरकालं क्रमन्तां भूमौ शत्रुषु च प्रवर्तन्तां, वर्षस्य शत्रुसंहारस्य च स्वाधिकारप्राप्तत्वात् इति भावः । तथा नाकस्य स्वर्गस्य नागस्य ऐरावतस्य च सम्बन्धी मदेन हर्षेण युक्ता ये दानवारयो देवाः इति मध्यमपदलोपिसमासः तैः यो विभवः सम्पत्समृद्धिरिति यावत् मदेन स्वाभाविकेन भक्षणादिकृतेन वा गर्वेण हर्षेण वा यद्दानं गजमदः तत्सम्बन्धिनां वारीणां जलानां विभवः सम्पत् स च नो नश्येत् न नाशं प्राप्नुयात् । स्वर्गस्य देवकृतसमृद्धेः ऐरावतसम्बन्धिमदजलधारायाश्च नाशो मा भूदित्यर्थः । मम जयन्तः जयन्ताख्योयं पुत्रः नित्यं सदा सुखं दधतां धारयतु दध धारण इत्यस्मात् लोटि तङ् । सैनिकाश्च सेनासमवेताः पुरुषाश्च जयन्तः जयं प्राप्नुवन्तस्सन्तःजयतेर्लटश्शति रूपम् । नित्यं सुखं दधतां धारयन्तु धात्वो लोटि झेरदभ्यस्तादिति अदादेशः । इत्थं एवंभूताः त्वत्पादांबुजयोः पततीति त्वत्पादांबुजपाती तस्य सुरपतेः इन्द्र-

स्य अर्थना याचनाः जयन्ति सर्वोत्कर्षेण वर्तन्ते उत्कर्षश्च शिवशक्तिरूपदेवीविषयकत्वेन साफल्यनिश्चयात् बोध्यः । मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः इति मेदिनी । विभवो धननिर्वृत्योरिति हैमः । याच्ञाभिशस्तिर्याचनार्थनेत्यमरः । अत्र इन्द्रप्रार्थनायां प्रस्तुतयोः मेघकुलिशादीनां अप्रतिबद्धधाराप्रवर्तनादिरूपैकधर्मसम्बन्धस्य प्रार्थनाविषयत्वेन वर्णनात् श्लेषसङ्कीर्णं तुल्ययोगितालङ्कारत्रयं तेषां च संसृष्टिः ॥ ६१ ॥

आज्यासक्तकरैर्द्विजन्मभिरहं हूयेय नो दानवैः
स्वाहारोचितमस्तु पार्श्वमनिशं तादृक्च हव्यं लभै ।
रक्षावानिति भूतिमानिति च मे शब्दप्रसिध्या शिवे
नोपेक्ष्योहामिति त्वदंघ्रिनमने जीयासुरग्नेर्गिरः ॥ ६२॥

अथाग्नेः प्रार्थनां वर्णयन् श्रीपादं स्तौति । आज्यासक्तकरैरिति —हे शिवे द्विजन्मभिः ब्राह्मणैः कर्तृभिः आज्यासक्तकरैः आज्ये आसक्तः होमार्थं प्रवृत्तः करो जुहुसहितो हस्तः येषां तैः अहं हूयेय हुतः स्याम् । ब्राह्मणकृतघृतादिहोमेनाहं तृप्तो भवेयमित्यर्थः । जुहोतेः कर्मणि लिङ् । आजौ युद्धे आसक्तकरैः सन्नद्धहस्तैः दानवैः असुरैः अहं नो हूयेय युद्धाद्यर्थं नाहूतः स्यां असुरबाधारहितो भवेयमित्यर्थः । ह्वेञः कर्मणि लिङि इटि यकि सम्प्रसारणे दीर्घः। तथा मे पार्श्वमनिशं सदा स्वाहया मत्क्रियया रोचितं शो-

भितमस्तु अहं सदा प्रियया सहितः स्यामित्यर्थः । तथा अहं तादृक् स्वाहारोचितं स्वाहेत्यव्ययं देवहविर्दाने वर्तते तद्रोचितं हव्यं देवान्नं च लभै प्राप्नुयां विधिहुतहव्यभुक्च स्यां इत्यर्थः । अथाग्नेयी स्वाहा च हुतभुक्प्रिया स्वाहा देवहविर्दान इति चामरः । मे रक्षा अग्निदग्धगोमयविशेषः रक्षणं च अस्यास्तीति रक्षावान्, भूतेः अग्निदग्धगोमयविशेषः ऐश्वर्यं च सास्यास्तीति भूतिमान् इति च शब्देन प्रसिध्या प्रख्यात्या हेतुना त्वया अहं नोपेक्ष्योस्मि त्वदुपेक्षायां मम रक्षा ऐश्वर्यं च न स्यात्, अतः त्वदेकशरणः त्वत्प्रसादलब्धैश्वर्यवांश्चाहं त्वया कदापि नोपेक्षणीय इत्यर्थः । तदुक्तं लघुधर्मप्रकाशिकायां— कपिलायाः पुरीषेण जाताभूतिरिति स्मृता । कृष्णाया गोः पुरीषेण जातन्तु भसितं विदुः भस्मलोहितवर्णायाः श्वेतायाः क्षार उच्यते । नानारूपवती गौर्याः तस्या रक्षेति कीर्त्यत इति । इति एवंभूताः तवांघ्रिनमने पादप्रणामसमये अम्रेर्गिरः प्रार्थनावचनानि जीयासुः सर्वोत्कर्षेण वर्तन्तां जयतेराशिषि लिङ् । श्लेषोलङ्कारः ॥६२

त्वद्भक्ताघमबुद्धिपूर्वलिखितं स्याच्चेत् क्षमेथाः शिवे
कान्तस्ते मयि रोषवान् कुरु पुनस्ततस्यार्द्रभावं शनैः।
देवि त्वं महिषाभिहन्ति चकितं त्रायस्व मे वाहनं
कालस्येति जयन्ति ते पदनतौ लोलस्य सम्प्रार्थनाः ॥

धर्मराजस्य प्रार्थनां वर्णयन् श्रीपादं स्तौति । तव भक्तानां सम्बन्धि अघं त्वद्भक्ताघं मया बुद्धिपूर्वं न भवतीति अबुद्धिपूर्वं यथा तथा लिखितं स्याच्चेत् एते भक्ता इति ज्ञानपूर्वं मया न लिखितं अज्ञानपूर्वं लिखितं स्याद्यदि तर्हि हे शिवे त्वं क्षमेथाः तमपराधमित्यादिः । पापलेखनस्य चित्रगुप्तकर्तृकत्वप्रसिद्धावपि तत्स्वामित्वात् काले सेनाजयस्य राजनीव निर्देशः । ते तव कान्तः प्रियः शिवः मयि विषये रोषवान् कोपवान् भवति अन्तकरिपुत्वादिति भावः । त्वं पुनः त्वं तु तस्य शिवस्य शनैः आर्द्रभावं सान्त्ववचनेन कोपापनयनं कृत्वा मयि दयार्द्रत्वं कुरु विधेहि । हे महिषाभिहन्त्रि महिषासुरध्वंसिनि देवि त्वं चकितं महिषहन्त्रीत्वात् त्वत्तो भीतं मे मम वाहनं वाहनभूतं महिषं कालस्य महिषवाहनत्वं प्रसिद्धं त्रायस्व रक्ष इत्येवंभूताः ते पदनतौ तव पादप्रणामे लोलस्य सतृष्णस्य कालस्य धर्मराजस्य संप्रार्थनाः जयन्ति । अत्र महिषाभिहन्त्रीति विशेषणस्य साभिप्रायत्वात् परिकरालङ्कारः । अलङ्कारः परिकरः साभिप्राये विशेषणे इति लक्षणात् ॥ ६३ ॥

धर्माचारपरोहमित्यवमतो रक्षोभिरेकान्वयै-
र्मह्यं देवि विनिन्दितां दिशमदुर्जातिद्विषश्चामराः ।
दैवादित्युभयच्युतो विशरणो रक्ष्योहमित्यादय-
स्त्वत्पादप्रणतौ जयन्ति निरृतेरत्याकुलाः प्रार्थनाः ॥

निरृतेः प्रार्थनां वर्णयन् श्रीपादं स्तौति । धर्माचारपर इति— हे देवि अहं धर्माचारः सुकृतानुष्ठानं परः प्रधानं यस्य सः तथोक्तो भवामि इति हेतोः एकः अन्वयो वंशो येषां तैः एकान्वयैः अपि रक्षोभिः राक्षसैः कर्तृभिः अहं अवमतः अवज्ञातः स्वजातेः भ्रंशित इत्यर्थः । तथा जात्या जन्मना द्विषन्तीति जातिद्विषः राक्षसजातिद्वेषिणः अमराः देवाश्च मह्यं विनिन्दितां मूत्रपुरीषाद्युत्सर्गाविधानेन कुत्सिताम् । तदुक्तं विष्णुपुराणे नैरृत्यामिषुविक्षेपमतीत्याभ्याधिकं भुवः दूरादावसथान्मूत्रं पुरीषञ्च समाचरेत् इति । दिशं आशां अदुः पालयत्वेन दत्तवन्तः । देवैरपि जातिद्वेषेण स्वगणात् भ्रंशितोहमित्यर्थः । दैवात् प्रारब्धकर्मणः हेतोः इति उक्तप्रकारेण उभयस्मात् राक्षसदैववर्गात् च्युतः भ्रष्टः अत एव विगतं शरणं रक्षिता यस्मात् सः विशरणः अनाथः अहं त्वया रक्ष्यः पालनीयो भवामि इति एवंप्रकाराः प्रार्थना आदिः प्रभृतिः यासां ताः इत्यादयः । आदिशब्दस्य प्रकारार्थत्वात् एवंप्रकारा वा। तव पादप्रणतौ निरृतेः तन्नाम्नो दिक्पालस्य अत्याकुलाः अतिदीनाः प्रार्थनाः जयन्ति । अत्र धर्माचारपर इत्यादि वाक्यार्थस्य राक्षसावज्ञायां जातिद्विष इत्यादि पदार्थस्य कुत्सितदिक्पालत्वदानादौ हेतुत्वात् वाक्यार्थहेतुकं पदार्थहेतुकं च काव्यलिङ्गमलङ्कारः । तयोश्च तिलतण्डुलन्यायेन संसृष्टिः ॥ ६४ ॥

मत्पुत्र्या मम वा मुकुन्दगृहताभाग्यन्न संक्षीयतां
माहं पायिषि कुंभजेन मुनिना कल्पान्तसूर्येण वा ।
द्वेधा मे सुरवाहिनीदयितता साधु त्वया रक्ष्यतां
त्वत्पादांबुजपातिनो जलपतेरित्थं जयन्त्यर्थनाः ॥६५॥

वरुणस्य प्रार्थनां वर्णयन् श्रीपादं स्तौति । मदिति—हे देवि मम पुत्र्याःरमायाः मम च मुकुन्दस्य विष्णोःगृहतायां कळत्रत्वे भवनत्वे च यत् भाग्यं कारणभूतं शुभकर्म मुकुन्दगृहता एव भाग्यमिति वा तत् त्वया न संक्षीयतां नाशं प्राप्यतां अन्तर्भावितण्यर्थात् क्षयतेः कर्मणि लोट् । गृहं गृहाश्च पुंभूम्नि कळत्रेपि च सद्मनीति मेदिनी । सागरवरुणयोः अभेदमभिप्रेत्येदं एवमुत्तरत्रापि कुम्भजेन मुनिना अगस्त्येन कल्पान्तसूर्येण प्रळयादित्येन वा उभयत्र वाकारश्चार्थे कर्त्रा अहं मा पायिषि मा पीतो भवेयं मे मम संबन्धिनी द्वेधा द्विप्रकारा सुरवाहिनीदयितता देवनदीपतित्वं देवसेनापतित्वं चेत्यर्थः । त्वया साधु सम्यक् रक्ष्यतां पाल्यतां मम इदानीन्तनी श्रेयस्समृद्धिः न नश्यतु आपन्नमाभूदित्यर्थः । इत्थं एवंप्रकाराः त्वत्पादांबुजयोः पततीति त्वत्पादांबुजपाती तस्य पादप्रणतस्य जलपतेः वरुणस्य अर्थनाः याचनाः जयन्ति सर्वोत्कर्षेण वर्तन्ते । अत्र रमावरुणयोः मुकुन्दगृहतारूपैकधर्मसंबन्धवर्णनात् तुल्ययोगिताभेदः स च श्लेषसङ्कीर्णः ॥ ६५ ॥

विश्वप्राणमयी त्वमेव मम तु प्राहुर्जगत्प्राणतां
सर्वस्यापि सदागतिर्हि भवती मामेवमाहुर्जना: ।
लज्जापादकमीदृशं जननि न: किं कुर्महे पाहि मा-
मित्येवं पवनस्य ते पदनतौ वाचो जयन्त्याकुला: ।

वायोर्विनयपूर्विकां प्रार्थनां वर्णयन् श्रीपादं स्तौति । वि-
श्वेति — हे जननि लोकमात: वस्तुतस्त्वमेव विश्वेषां सर्वेषां प्रा-
णिनां जगतां प्राणमयी शक्तिरूपा । शक्ति: पराक्रमप्राणावित्यमर:
भवसि जनाम्तु मम जगत्प्राणतां जगतां प्राण: जगत्प्राण:
जगच्चासौ प्राणश्चेति वा । जगत् स्याद्विष्टपे क्लीबं पायौ ना ज-
ङ्घमे त्रिषु इति रुद्रकोशात् । समीरमारुतमरुज्जगत्प्राणसमीर-
णा इत्यमरकोशाच्च । तत्तां प्राहु: प्रवदन्ति । तथा भवती स-
र्वस्यापि जनस्य सदा सर्वदा गति: आश्रयो भवति जना: मां
एवं सदागतिं मातरिश्वा सदागतिरिति कोशादिति भाव: । ईदृ-
शं एवंभूतं त्वयि प्रयोक्तुमुचितस्य शब्दस्य मयि प्रयोगरूपं व-
चनमिति शेष: । न: त्वद्भक्तानामस्माकं लज्जामापादयति प्राप-
यतीति लज्जापादकं लज्जाकरं भवति वयं किं कुर्महे । इदमयु-
क्तमित्यर्थ: । त्वं मां पाहि इतिशब्दो भेदे । इत्येवं एवंप्रकारा: ते
तव पदनतौ पादप्रणामसमये पवनस्य वायो: आकुला: दीना: वा-
च: प्रार्थनावचनानि जयन्ति । अत्र वायुनिष्ठयो: जगत्प्राणत्वस-

दागतित्वयोः जनाः प्राहुरित्यस्वरससूचनेन अपह्नवः कृतः । स च देव्यां तदारोपार्थ इति पर्यस्तापह्नुतिरलङ्कारः । स च श्लेषसङ्कीर्णः ॥ ६६ ॥

शंखोल्लासिगळोज्वले समकरे पद्मेन कुन्दस्मिते
पादाग्राद्दतकच्छपे मुखमहापद्मे मुकुन्दाश्रिते ।
इत्यस्मन्निधिगात्रि नीलनयने चर्चात्मिके पाहि मा-
मित्थं पादनतिः शिवे विजयते सख्युः कुबेरस्य ते ॥

महापद्मश्च पद्मश्च शंखो मकरकच्छपौ । मुकुन्दकुन्द-नीलाश्च चर्चश्च निधयो नवेत्यमरकोशोक्तनवनिधिपतेः वैश्रवण-स्य यस्य यद्वस्तु प्रियं भवति तस्य तद्विशिष्टत्वेन स्तुत्यस्तुतिः स्वभावसिद्धेति लोकरीतिमनुसृत्य श्लेषभंग्या नवनिधिसम्पत्ति-स्तुतिपूर्विकां प्रार्थनां वर्णयन् श्रीपादं स्तौति । शंखेति— शंख इव शंखेन निधिना च उल्लासिना प्रकाशमानेन गळेन कण्ठेन उज्वला शोभमाना तस्यास्संबुद्धिः शंखोल्लासिगळोज्वले । पद्मेन अरविन्देन निधिना च समौ तुल्यौ साधू च करौ हस्तौ यस्याः सा समकरा मकरेण मकराख्येन निधिना सह वर्तत इति स-मकरा च । सर्वसाधुसमानेषु समं स्यादभिधेयवदिति मेदिनि । कुन्दमिव कुन्दकुसुममिव स्मितं यस्याः सा कुन्दस्मिता तस्याः संबुद्धिः कुन्दस्मिते । पादयोर-

ग्रेण उपरिभागेन आहतः स्वसादृश्यसौहृदात् अर्चितः आदरेण स्वीकृतश्च कच्छपः कूर्मः कच्छपाख्यो निधिश्च यस्याः तस्याः संबुद्धिः पादाग्राहतकच्छपे। मुखं महापद्ममिव यस्याः मुखमेव महापद्मः तदाख्यो निधिः यस्याश्च मुखे महापद्मः यस्या इति वा तस्याः संबुद्धिः मुखमहापद्मे। मुकुन्दाश्रिते विष्णुसेविते मुकुन्दाख्यनिधिसहिते च । तथा नीले नयने नेत्रे नीलस्तदाख्यो निधिः नयनयोश्च यस्याः तस्याः संबुद्धिः नीलनयने। चर्चा चन्दनादिना अनुलेपनविशेषः आत्मनि देहे यस्याः सा चर्चात्मिका चर्चिकारूपा वा चर्चः तदाख्यो निधिः आत्मनि यस्याः सा च तस्याः संबुद्धिः चर्चात्मिके। इत्युक्तप्रकारेण अस्माकं निधयः शंखपद्मादयः शेवधयः गात्रे यस्याः सा अस्मन्निधिगात्री अस्मन्निधिरूपगात्री च गात्रशब्देन तद्विलासोपि गृह्यते। कुन्दस्मिते इति संबुध्यनुरोधात् तस्याः संबुद्धिः अस्मन्निधिगात्रि। एवंभूते हे शिवे पार्वति त्वं मां पाहि इत्थं एवंप्रकारप्रार्थनावचनविशिष्टा ते तव सख्युः कुबेरस्य पादनतिः पादप्रणामो विजयते सर्वोत्कर्षेण वर्तते । अत्र शंखोल्लासिगळोज्वल इत्यादिपदार्थानां अस्मन्निधिगात्रीति पदार्थं प्रति हेतुत्वात् पदार्थहेतुकं काव्यलिङ्गं श्लेषश्चालङ्कारः। तयोश्च सङ्करः ॥ ६७ ॥

सन्नामेषु भवत्पादांबुजनखच्छायां जटासङ्गिनीं
गङ्गेत्याळिजना वदन्ति वितथं मा भूर्मुधा कोपिनी ।

दृष्टिर्मय्ययि नीयतां परुषमप्येकं वचो दीयता-
मीशानस्य भवानि ते पदनतावित्थं जयन्त्यर्थनाः ॥

इन्द्रो वह्निः पितृपतिः निर्ऋतिर्वरुणो मरुत् कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् इति कोशे दिक्पालमध्ये गणितस्य शिवस्य भर्तुः प्रार्थनां तेन देव्वाः सौभाग्यातिशयं च वर्णयन् श्रीपादं स्तौति । सन्नामेष्वित्यादि— अयि प्रिये अयीत्यनुनये सन्नामेषु ईर्ष्याकोपिनीं त्वां सान्त्वयतो मम प्रणामेषु जटासङ्गिनीं भवत्याः पादांबुजयोर्नखानां छायां कान्तिं धवलामिति भावः । आलिजनाः सखीजनाः वितथं असत्यं यथा तथा गङ्गेति वदन्ति त्वामिति शेषः । वर्णसादृश्यादिति भावः । त्वं मुधा व्यर्थं कोपिनी भ्रान्तसखीजनवचनविश्वासेन कोपवती मा भूः । माङि लुङिति लुङि न माङ्योग इत्यदप्रतिषेधः । अतः कोपं त्यक्त्वा त्वया मयि विषये दृष्टिः नेत्रं नीयतां प्राप्यतां कर्मणि लोट् । एकेनापि चक्षुषा मां पश्येत्यर्थः । परुषं निष्ठुरमपि एकं वचो मह्यं त्वया दीयतां निष्ठुरमपि किञ्चिन्मां वदेत्यर्थः । उभयत्र प्रार्थनायां लोट् । इत्थंभूताः हे भवानि भवपत्नि । ईशानस्य शिवस्य ते तव पदनतौ पादप्रणामसमये प्रार्थनाः प्रार्थनावचनानि जयन्ति सर्वोत्कर्षेण वर्तन्ते । अत्र गङ्गायां गङ्गात्वमपह्नुत्य देवीनखकान्तित्ववर्णनात् अपह्नवभेदः । तथा ग-

ङ्गेति वदन्तीति वाक्यार्थस्य उत्तरवाक्यार्थं प्रति हेतुत्वात् काव्यलिङ्गभेदः तयोश्च सङ्करः ॥ ६८ ॥

नाभीतोभवमादितस्तव बलात् पश्चादभीतोस्म्यहं
त्र्यक्षेण त्रिमुखीकृतोपि चतुरास्योहं तवैघ स्तवैः ।
त्वं विश्वात्मतयोपजन्य न पुनः स्रष्टारमाख्याहि मा-
मित्थं देवि जयन्ति ते पदनतौ वाणीपतेर्वाणयः ॥

ऊर्ध्वादिक्पतेर्ब्रह्मणः प्रार्थनां वर्णयन् श्रीपादं स्तौति । नाभीत इति— हे देवि अहं आदितः आदौ सृष्टेः पूर्वमित्यर्थः । सार्वविभक्तिकस्तसिः । नाभीतः नाभिदेशात् विष्णोरिति शेषः । अभवं जातः तदा अभीतो भयरहितो नाभवं किन्तु विष्णुकर्णमलोद्भूतौ आत्मानं हन्तुमुद्यतौ मधुकैटभौ दृष्ट्वा भीत एवाभवमित्यर्थः । पश्चात् मत्कृतस्तुत्यनन्तरं तव बलात् सामर्थ्यात् विष्णूत्थापनरूपात् अहं अभीतोस्मि । विष्णुना दैत्यघातनेन भयरहितोस्मि इदानीमपि भयाभावात् वर्तमाने लट् प्रयोगः । तथाहं त्र्यक्षेण त्र्यम्बकेन शिवेन त्रीणि मुखानि यस्य सः त्रिमुखः चतुराननत्वात् अत्रिमुखः त्रिमुखस्सम्पद्यमानः कृतः त्रिमुखीकृतः अपि अभूततद्भावे इति च्विः । ब्रह्मणः पञ्चमशिरो नखाग्रेणाच्छिनद्धर इति पुराणवचनविरोधः कल्पभेदमाश्रित्य परिहरणीयः । अत एव श्रीमद्भागवते विरिञ्चाविर्भावप्र-

करणे— सचांभोरुहकर्णिकायामवस्थितो लोकमपश्यमानः परिक्रमन् व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेनुदिशं मुखानि । इत्युक्तम् । तव स्तवैः स्तुतिभिरेव चतुराणि दक्षाणि आस्यानि मुखानि यस्य सः चत्वारि आस्यानि यस्य स चाभवं त्वं विश्वमेव भुवनमेवात्मा स्वरूपः यस्याः तस्याः भावः विश्वात्मता तया विश्वात्मतया प्रपञ्चस्वरूपेणेति यावत् उपजन्य भूत्वा मां स्रष्टारं भुवनसृष्टिकर्तारं मा आख्याहि मा वद त्वमेव विश्वस्रष्ट्री नाहमित्यर्थः । इत्थमेवंभूताः हे देवि ते तव पदनतौ पदप्रणामसमये वाणीपतेर्ब्रह्मणः वाणयः प्रार्थनावचनानि जयन्ति । ह्रस्वान्नो वाणिशब्दः कृदिकारादिति ङीषि दीर्घान्तोपि । अत्र विधौ नाभीतत्वाभीतत्वयोः त्रिमुखत्वचतुरास्यत्वयोश्च वर्ण्यमानयोर्विरोधस्याभासमानत्वात् विरोधाभासोलङ्कारः ॥ ६९॥

आशीरस्ति मुखे विडम्बयति मां भूयोपि चाशीस्पृहा
भोगास्सन्ति सहस्रधा पुनरहं भोगान् कथं प्रार्थये ।
शेषोहं स्पृहयाम्यशेषसुखमित्येतच्च हासास्पदं
नाथे चिन्तय सर्वमित्यहिपतेस्त्वत्पादपातो जयेत् ॥

शेषस्य प्रार्थनां वर्णयन् श्रीपादं स्तौति । आशीरितिमम मुखे आस्ये आशीः अहिदंष्ट्रा हिताशंसा चास्ति । निक्षीत्वाशीर्हिताशंसाहिदंष्ट्रयोरित्यमरः । भूयोपि आशीस्सिध्य-

नन्तरमपि आशिषि त्वदाश्रयायां मद्विषयिण्यां हिताशंसा यां स्पृहा आग्रहः मत्कर्तृक इत्यर्थः । मां विडम्बयति उपहासयतीत्यर्थः । धनानि प्रार्थ्यन्तामिति चेत्तत्राह भोगा इति— मम सहस्रधा सहस्रप्रकाराः बहव इति यावत् । सु— संख्याया विधार्थे धा इति धाप्रत्ययः । इदं तत्कालविशेषणं वा । भोगाः धनानि फणाश्च सन्ति । नि— भोगस्सुखे धने च शेषेशशरीरफणयोर्मतः पालनेभ्यवहारे च योषिदादिभृतावपीति मेदिनी । अहं पुनः भोगसिध्यनन्तरं भोगान् धनानि कथं प्रार्थये सिद्धस्य प्रार्थनानर्हत्वादिति भावः । यद्वा आशिषस्सिद्धत्वे तज्जन्यधनाद्यनुभवः प्रार्थ्यतामिति चेत्तत्राह भोगा इति— भोगाः आशीस्सिद्धधनाद्यनुभवाः भोगान् सुखानि शेषं पूर्ववत् अथवा आशीस्सिद्धधनादिजन्यसुखानि प्रार्थ्यन्तां इति चेत्तत्राह भोगा इति— भोगाः सुखानि भोगान् सुखानि शेषं पूर्ववत् । ननु आशीस्सिद्धधनादिजन्यसुखमात्रं किमिति प्रार्थ्यते अशेषं सुखं प्रार्थ्यतामित्याशंक्याह शेष इति— शेषः अनन्तः अहं अशेषं समग्रं च तत्सुखं च अशेषसुखं अशेषस्य शेषभिन्नस्य सुखं च स्पृहयामि इच्छामीत्येतच्चाशेषसुखप्रार्थनं चेत्यर्थः । हासास्पदं उपहासस्थानं उपहासकारणमित्यर्थः भवति । शेषस्य मम शेषसुखप्रार्थनैवोचिता अशेषसुखप्रार्थना तु अनुचितत्वादुपहासकारणमित्यर्थः । तस्मात् हे नाथे स्वामिनि त्वमेव सर्वं मया प्रार्थनीयं सकलं चिन्तयालोचय मम तूत्करीत्या किमप्युचितं प्रार्थनीयं

न प्रतिभाति अतस्त्वमेवालोच्य कथयेत्यर्थः । चिन्तयेति प्रार्थनायां लोट् । इत्युक्तप्रकारकप्रार्थनावचनविशिष्टः अहिपतेः शेषस्य सम्बन्धी त्वत्पादयोः पातः नमस्कार इत्यर्थः । जयेत् सर्वोत्कर्षेण वर्ततताम् । अत्राशेषसुखपदार्थस्य ईप्सिततमत्वविवक्षया स्पृहेरीप्सित इति न सम्प्रदानत्वं अत एव ईप्सितमात्रे सम्प्रदानसंज्ञा प्रकर्षविवक्षायां तु परत्वात् कर्मसंज्ञेत्युक्तं सिद्धान्तकौमुद्याम् । इहाशीरस्तिमुख इत्यादि वाक्यार्थद्वयस्य तत्तदुत्तरवाक्यार्थं प्रति शेषपदार्थस्य तदुत्तरवाक्यार्थं प्रति च हेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गद्वयं पदार्थहेतुकं चैकमिति त्रयः काव्यलिङ्गमलङ्काराः । ते चाशीरित्यादि श्लेषमूलकाभेदाध्यवसायरूपातिशयोक्तिसङ्कीर्णाः ॥ ५० ॥

पार्वत्याः पदमत्र दृश्यमिति वा पादेभवत्वेन वा
साधुत्वात्तदुपास्तये हिततया पद्यान्यमूनि स्फुटम् ।
सैषा मुक्तिपुरीगिरीन्द्रतनयाभक्तेन नारायणे-
नाबद्धा खलु सप्ततिर्दिशतु वः कल्याणहल्लोहलम् ॥

अथ स्वकृतसप्ततिपद्यात्मकदेवीपादगुणविशेषप्रदर्शनाय पद्यनामनिरुक्तिपूर्वकं भक्तानामेतत्स्तोत्रपाठादिफलभूतमङ्गलसम्पत्तिदानं प्रार्थयन् स्तोत्रमुपसंहरति— पार्वत्याः अमूनि मत्कृतानि यत्संवाहनलोभिन इत्यादीनि पार्वत्या इत्याद्यन्तानि

पद्यानि अत्रैषु पद्येषु पठ्यमानेषु पार्वत्याः पदं द्रष्टुं शक्यं दृश्यमिति हेतोः देवीपदचाक्षुषप्रत्यक्षप्रयोजकत्वात् हेतोर्वेत्यर्थः । पार्वत्याः पादेभवानि तत्प्रतिपादकानीत्यर्थः । तेषां भावः भवत्वं तेन पार्वतीपादप्रतिपादकत्वेन वेत्यर्थः । पार्वत्याः पादे साधुत्वात् पादप्राप्तिजनकत्वाद्वेत्यर्थः । तदुपास्तये पादोपासनाय हितानि पादोपासनासाधकानीत्यर्थः । तत्तया वा स्फुटं व्यक्तं पद्यानि पद्यनामकानि भवन्ति तत्राद्ये पदमेषु दृश्यमिति व्युत्पत्त्या पदमस्मिन् दृश्यमिति सूत्रेण पदशब्दात् यत्प्रत्यये पद्यानीति, द्वितीये पादेभवानीति व्युत्पत्त्या शरीरावयवाच्चेति यत्प्रत्यये पद्यस्य तदर्थे इति पादशब्दस्य पदादेशे पद्यानीति, तृतीये पादे साधूनीति व्युत्पत्त्या पादशब्दाद्यत्प्रत्यये पदादेशे पद्यानीति, चतुर्थे पादाय हितानीत्यर्थे शरीरावयवाद्यदिति यत्प्रत्यये पदादेशे पद्यानीति च सिद्धम् । एतेनैतत्स्तोत्रघटकपद्यानां देवीपादप्रत्यक्षप्रयोजकत्व—तद्गुणबोधकत्व—तत्प्राप्तिहेतुत्व—तदुपासनासाधकत्वान्युक्तानीति ज्ञेयम् । मुक्तिपुर्यां मुक्तिस्थले या गिरीन्द्रतनया श्रीपार्वती तस्यां भक्तेन भक्तिमता नारायणेन नारायणनाम्ना भट्टेन कविनेत्यर्थः आबद्धा निबद्धा सा उक्तरीत्यान्वर्थपद्ययुक्ता एषा सप्तिः सप्तिसंख्याकपद्यरूपत्वात् सप्तिः श्रीपादसप्तिनामकस्तोत्रमित्यर्थः । वो भक्तानां युष्माकं भक्तेभ्यो युष्मभ्यं वा कल्याणानां मङ्गलानां हल्लोहलं अहं पूर्वमहं पूर्वमिति त्वराजनकमहङ्कारं प्राप्तौ त्वराजनकाहङ्का-

युक्तानि मङ्गळानीत्यर्थः । दिशतु खलु ददात्वेव । अत्र पादास्सन्त्यस्येतीति व्युत्पन्नस्य पद्यशब्दस्य योगेन पदमेषु दृश्यमित्याद्यन्यार्थत्वकल्पनान्निरुक्तिरलङ्कारः । तदुक्तम्— निरुक्तियोगतो नाम्नामन्यार्थत्वप्रकल्पनमिति । तेन च कवेः देव्यां भक्त्यतिशयरूपं वस्तु व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः । इति सर्वं शिवम् ॥

इमां व्याख्यां महादेवीपादांभोजेर्पयाम्यहम् ।
शब्दायमाना सा तत्र धत्तां मधुकरीश्रियम् ॥

॥ शुभमस्तु ॥

